कक्षा-10

# पीयूषम्

## द्वितीयो भागः

ABSOL



# INDIAN ARMY

**Arms you FOR LIFE AND CAREER AS AN OFFICER**
**Visit us at www.joinindianarmy.nic.in**
**or call us (011) 26173215, 26175473, 26172861**

| Ser NO | Course | Vacancies Per Course | Age | Qualification | Appln to be received by | Training Academy | Duration of Training |
|---|---|---|---|---|---|---|---|
| 1. | NDA | 300 | 16½ - 19 Yrs | 10+2 for Army 10+2 (PCM) for AF, Navy | 10 Nov & 10 Apr (by UPSC) | NDA Pune | 3 Yrs + 1 yr at IMA |
| 2. | 10+2 (TES) Tech Entry Scheme | 85 | 16½ - 19½ Yrs | 10+2 (PCM) (aggregate 70% and above) | 30 Jun & 31 Oct | IMA Dehradun | 5 Yrs |
| 3. | IMA(DE) | 250 | 19 - 24 Yrs | Graduation | May & Oct (by UPSC) | IMA Dehradun | 1½ Yrs |
| 4. | SSC (NT) (Men) | 175 | 19 - 25 Yrs | Graduation | May & Oct (by UPSC) | OTA Chennai | 49 Weeks |
| 5. | SSC (NT) (Women) (including Non- tech Specialists and JAG entry) | As notified | 19 - 25 Yrs for Graduates 21-27 Yrs for Post Graduate/ Specialists/ JAG | Graduation/ Post Graduation /Degree with Diploma/ BA LLB | Feb/Mar & Jul/ Aug (by UPSC) | OTA Chennai | 49 Weeks |
| 6. | NCC (SPL) (Men) | 50 | 19 - 25 Yrs | Graduate 50% marks & NCC 'C' Certificate (min B Grade) | Oct/ Nov & Apr/ May | OTA Chennai | 49 Weeks |
| | NCC (SPL) (Women) | As notified | | | | | |
| 7. | JAG (Men) | As notified | 21 - 27 Yrs | Graduate with LLB/ LLM with 55% marks | Apr / May | OTA Chennai | 49 Weeks |
| 8. | UES | 60 | 19-25 Yrs (FY)18-24 Yrs (PFY) | BE/B Tech | 31 Jul | IMA Dehradun | One Year |
| 9. | TGC (Engineers) | As notified | 20-27 Yrs | BE/ B Tech | Apr/ May & Oct/ Nov | IMA Dehradun | One Year |
| 10. | TGC (AEC) | As notified | 23-27 Yrs | MA/ M Sc. in 1st or 2nd Div | Apr/ May & Oct/ Nov | IMA Dehradun | One Year |
| 11 | SSC (T) (Men) | 50 | 20-27 Yrs | Engg Degree | Apr/ May & Oct/ Nov | OTA Chennai | 49 Weeks |
| 12. | SSC (T) (Women) | As notified | 20-27 Yrs | Engg Degree | Feb/ Mar & Jul/ Aug | OTA Chennai | 49 Weeks |

# वन्दे मातरम्

सुजलां सुफलां मलयजशीतलाम्
शस्य-श्यामलां मातरम्।
वन्दे मातरम्॥
शुभ्र-ज्योत्स्ना-पुलकित-यामिनीम्
फुल्ल-कुसुमित-द्रुमदल-शोभिनीम्
सुहासिनीं, सुमधुरभाषिणीम्
सुखदां, वरदां, मातरम्।
वन्दे मातरम्॥

ABSOL
PATNA





# राष्ट्र-गान

जन-गण-मन-अधिनायक जय हे,
भारत - भाग्य - विधाता।
पंजाब सिंध गुजरात मराठा,
द्राविड़ - उत्कल - बंग,
विंध्य - हिमाचल - यमुना-गंगा,
उच्छल - जलधि - तरंग।
तव शुभ नामे जागे,
तव शुभ आशिष मागे
गाहे तव जय गाथा।
जन-गण-मंगलदायक जय हे,
भारत - भाग्य - विधाता।
जय हे, जय हे, जय हे,
जय जय जय जय हे।

बिहार स्टेट टेक्स्टबुक पब्लिशिंग कॉरपोरेशन लिमिटेड, बुद्ध मार्ग, पटना-1
BIHAR STATE TEXT BOOK PUBLISHING CORPORATION LTD., BUDH MARG, PATNA-1

आवरण मुद्रण : श्री सांई ऑफसेट संदलपुर पटना-6

प्रथमः पाठः

# मङ्गलम्

[ उपनिषदः वैदिकवाङ्मयस्य अन्तिमे भागे दर्शनशास्त्रस्य सिद्धान्तान् प्रकटयन्ति। सर्वत्र परमपुरुषस्य परमात्मनः महिमा प्रधानतया गीयते। तेन परमात्मना जगत् व्याप्तमनुशासितं चास्ति। स एव सर्वेषां तपसां परमं लक्ष्यम्। अस्मिन् पाठे परमात्मपरा उपनिषदां पद्यात्मकाः पञ्च मन्त्राः संकलिताः सन्ति। ]

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये॥ ( ईशावास्य० 15 )

अणोरणीयान् महतो महीयान्
आत्मास्य जन्तोर्निहितो गुहायाम्।
तमक्रतुः पश्यति वीतशोको
धातुप्रसादान्महिमानमात्मनः॥ ( कठ० 1.2.20 )

सत्यमेव जयते नानृतं
सत्येन पन्था विततो देवयानः।
येनाक्रमन्त्यृषयो ह्याप्तकामा
यत्र तत् सत्यस्य परं निधानम् ॥ ( मुण्डक० 3,1.6 )

यथा नद्यः स्यन्दमानाः समुद्रे-
ऽस्तं गच्छन्ति नामरूपे विहाय।
तथा विद्वान् नामरूपाद् विमुक्तः
परात्परं पुरुषमुपैति दिव्यम्॥ ( मुण्डक० 3.2.8 )

SOL PATNA SOLUTIONS

वेदाहमेतं पुरुषं महान्तम्
आदित्यवर्णं तमसः परस्तात्।
तमेव विदित्वाति मृत्युमेति
नान्यः पन्था विद्यतेऽयनाय॥ (श्वेताश्वतर० 3.8)

## अन्वयाः

हे पूषन्! सत्यस्य मुखं हिरण्मयेन पात्रेण अपिहितं (वर्तते), तत् सत्यधर्माय (मह्यं) दृष्टये अपावृणु ॥1॥

जन्तोः गुहायां निहितः (अयम्) आत्मा अणोः अणीयान्, महतः महीयान् (च वर्तते) अक्रतुः धातुप्रसादात् आत्मनः तम् महिमानं पश्यति, वीतशोकः (च भवति)। सत्यम् एव जयते अनृतं न (जयते) ॥ 2 ॥

सत्येन (एव) देवयानः पन्थाः विततः (वर्तते), येन हि आप्तकामाः ऋषयः (तत् सत्यं) आक्रमन्ति यत्र सत्यस्य तत्परं निधानम् (अस्ति) ॥ 3 ॥

यथा नद्यः स्यन्दमानाः (सत्यः) नामरूपे विहाय समुद्रे अस्तं गच्छन्ति तथा (एव) विद्वान् नामरूपाद् विमुक्तः सन् (तं) दिव्यम् परात्परं पुरुषम् उपैति ॥4॥

अहं तमसः परस्तात् आदित्यवर्णम् एतं महान्तं पुरुषं वेद। तम् एव विदित्वा मृत्युम् अत्येति (एतस्मात् पृथग्) अन्यः पन्थाः अयनाय न विद्यते ॥5॥

## शब्दार्थाः

| | | | | |
|---|---|---|---|---|
| हिरण्मयेन | – | स्वर्णमयेन, ज्योतिर्मयेन | – | सोने-सा, ज्योतिर्मय |
| पात्रेण | – | आवरणेन | – | पात्र से, आवरण से |
| सत्यस्य | – | ऋतस्य | – | सत्य का |
| अपिहितम् | – | आच्छादितम् | – | ढका हुआ |
| मुखम् | – | आस्यम्, द्वारम् | – | मुख, द्वार |
| अपावृणु | – | अपसारय | – | हटा दें |
| सत्यधर्माय | – | सत्यधर्मवते | – | सत्यधर्मवान् के लिए |
| दृष्टये | – | उपलब्धये | – | प्राप्ति के लिए |
| अणोः | – | सूक्ष्मात् | – | अणु से, सूक्ष्म से |

| | | | | |
|---|---|---|---|---|
| अणीयान् | – | सूक्ष्मतरः | – | सूक्ष्म, अणु |
| महतः | – | बृहतः | – | महान से |
| महीयान् | – | महत्तरः | – | महान् |
| जन्तोः | – | प्राणिनः | – | प्राणी के |
| गुहायाम् | – | हृदि | – | हृदय रूपी गुफा में |
| वीतशोकः | – | शोकरहितः | – | शोक रहित |
| पन्थाः | – | मार्गः | – | मार्ग, रास्ता |
| विततः | – | विस्तीर्णः | – | विस्तार होता है |
| स्यन्दमानाः | – | प्रवहन्त्यः | – | प्रवाहित होती हुए, जाती हुई |
| अनृतम् | – | असत्यम् | – | मिथ्या, झूठ |
| अत्येति | – | पारंगच्छति | – | पार कर जाता है। |

## व्याकरणम्

**सन्धिविच्छेदः**

| | | | |
|---|---|---|---|
| (क) | सत्यस्यापिहितम् | – | सत्यस्य + अपिहितम् (अ + अ) दीर्घ |
| | पूषन्नपावृणु | – | पूषन् + अपावृणु (न् + अ) व्यंजन |
| | जन्तोर्निहितः | – | जन्तोः + निहितः (ः + न्) विसर्ग |
| | प्रसादान्महिमानमात्मनः | – | प्रसादात् + महिमानमात्मनः व्यंजन |
| | नानृतं | – | न + अनृतं (अ + अ) दीर्घ |
| | येनाक्रमन्त्यृषयो | – | येन + आक्रमन्ति + ऋषयः (अ+आ, दीर्घ, इ+ऋ, यण्) |
| | ह्याप्तकामा | – | हि + आप्तकामा (इ+आ) यण् |
| | पुरुषमुपैति | – | पुरुषम् + उप + एति, अ+ए = ऐ, वृद्धि |

## अभ्यासः

### ( मौखिकः )

1. **एकपदेन उत्तरं वदत –**

(क) हिरण्मयेन पात्रेण कस्य मुखम् अपिहितम् ?

(ख) सत्यधर्माय प्राप्तये किम् अपावृणु ?

(ग) ब्रह्मण: मुखं केन आच्छादितमस्ति ?

(घ) महतो महीयान् क: ?

(ङ) अणो: अणीयान् क: ?

(च) पृथिव्यादे: महत्परिमाणयुक्तात् पदार्थात् महत्तर: क: ?

(छ) कीदृश: पुरुष: निजेन्द्रियप्रसादात् आत्मन: महिमानं पश्यति शोकरहितश्च भवति ?

(ज) किं जयं प्राप्नोति ?

(झ) किं जयं न प्राप्नोति ?

(ञ) का: नाम रूपञ्च विहाय समुद्रे अस्तं गच्छन्ति ?

2. एतेषाम् पद्यानाम् प्रथम चरणं मौखिकरूपेण पूरयत -

(क) हिरण्मयेन ..............।

(ख) अणोरणीयान् ..............।

(ग) सत्यमेव जयते ..............।

(घ) यथा नद्य: ..............।

(ङ) वेदाहमेतं ..............।

3. एतेषां पदानाम् अर्थं वदत -

अपिहितम्, सत्यधर्माय, अणोरणीयान्, अक्रतु:, वीतशोक:, वितत:, देवयान:, आप्तकामा:, स्यन्दमाना:, अयनाय।

4. स्वस्मृत्या काञ्चित् संस्कृतप्रार्थनां श्रावयत।

## अभ्यास:

## ( लिखित: )

1. एकपदेन उत्तरं लिखत -

(क) सत्यस्य मुखं केन पात्रेण अपिहितम् अस्ति ?

(ख) पूषा कस्मै सत्यस्य मुखम् अपावृणुयात् ?

(ग) क: महतो महीयान् अस्ति ?

(घ) किं जयते ?

(ङ) देवयानः पन्थाः केन विततः अस्ति ?

(च) नद्यः के विहाय समुद्रे अस्तं गच्छन्ति ?

(छ) साधकः पुरुषं विदित्वा कम् अत्येति ?

2. अधोलिखितम् उदाहरणम् अनुसृत्य प्रदत्तप्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत - यथा -

प्रश्न : सत्यस्य मुखं केन अपिहितम् अस्ति ?

उत्तरं : सत्यस्य मुखं हिरण्मयेन पात्रेण अपिहितम् अस्ति।

(क) कस्य गुहायाम् अणोः अणीयान् आत्मा निहितः अस्ति ?

(ख) विद्वान् कस्मात् विमुक्तो भूत्वा परात्परं पुरुषम् उपैति ?

(ग) आप्तकामा ऋषयः केन पथा सत्यं प्राप्नुवन्ति ?

(घ) विद्वान् कीदृशं पुरुषं वेत्ति ?

3. सन्धि-विच्छेदं कुरुत -

(क) कस्यापिहितम्

(ख) अणोरणीयान्

(ग) जन्तोर्निहितः

(घ) ह्याप्तकामाः

(ङ) उपैति।

ABSOL SOLUTIONS ★ PATNA ★

4. प्रकृति-प्रत्ययनिदर्शनं कुरुत -

(क) अपिहितम्

(ख) निहितः

(ग) विमुक्तः

(घ) विहाय

(ङ) विततः

5. समास-विग्रहं कुरुत -

(क) अनृतम्

(ख) आदित्यवर्णम्

(ग) वीतशोकः

(घ) देवयानः

(ङ) नान्यः

6. रिक्तस्थानानि पूरयत -

(क) .................................... सत्यस्यापिहितं मुखम्।

(ख) .................................... महतो महीयान्।

(ग) .................................... नानृतम्।

(घ) यथा .................................... स्यन्दमानाः समुद्रे।

(ङ) तमेव .................................... मृत्युमेति।

7. अधोनिर्दिष्टानां पदानां स्ववाक्येषु प्रयोगं कुरुत -

(क) सत्यम्

(ख) सत्यस्य

(ग) गच्छन्ति,

(घ) विमुक्तः

(ङ) अन्यः।

## योग्यताविस्तारः

अनेन पाठेन सर्वशक्तिमतः सर्वव्यापकस्य सर्वाधारस्य सार्वकालिकस्य सत्यस्वरूपस्य च ईश्वरस्य वन्दनं कृतमस्ति।

'उपनिषद्' इति शब्दः उप + नि पूर्वकात् विशरण- गति- अवसादनार्थकात् षद्लृ धातोः क्विप् प्रत्यये कृते निष्पद्यते। अस्य शब्दस्य व्युत्पत्तिमूलकः अर्थः अस्ति-या विद्या संसारबीजस्य अविद्यादेः विशरणं = विदारणं कृत्वा ब्रह्म प्रति गमयति फलतः सर्वाणि पापानि अवसादितानि शिथिलानि नष्टानि करोति सा 'उपनिषद्'। अथवा उप = गुरुम् उपगम्य निषद् = उपविश्य शान्तचित्तः सन् गुरुमुखात् यद् अविद्यानाशकं पापमोचकं ब्रह्मसाक्षात्कारकं रहस्यं श्रूयते तत् शास्त्रम् उपनिषद् इति कथ्यते।

प्रतिवेदं प्रतिशाखम् उपनिषदः उपलब्धाः आसन्। किन्तु अधुना तथा तासाम्प्राप्तिः नास्ति। आदिशंकराचार्येण ईशादिदशोपनिषदां भाष्याणि लिखितानि सन्ति। उपनिषद् एव वेदान्तदर्शनस्य आधारः।

उपनिषत्सु आदर्शजीवनशैली उपनिबद्धा वर्तते। तदैव निरपेक्षभावेन विना फलाकांक्षया कर्त्तव्यकर्मणः सम्पादनं सांसारिकवस्तुषु अनासक्तिः सत्यस्य धर्मस्य आत्मनः परमात्मनः ईशसत्तायाश्च तत्त्वान्वेषणं सुखे-दुःखे, जये-पराजये, लाभे-हानौ अन्यविषमदशायाञ्च एकरसतादिविषयाः उपनिषत्सु प्रतिपादिताः सन्ति।

श्रीमद्भगवद्गीता उपनिषदां सारभूता वर्तते।

**सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।**
**पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥**

प्रायः उपनिषदाम् आदौ अन्ते च शान्तिपाठः प्रदत्तः दृश्यते। तत्र प्रमुखः शान्तिपाठः अत्र लिख्यते

(1) ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥

(2) ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै।
तेजस्वि नावधीतमस्तु। मा विद्विषावहै॥
ॐ शान्तिः! शान्ति!! शान्तिः!!!

वैदिकमन्त्राणां सस्वरवाचनस्य प्रशिक्षणं करणीयम्।

□

द्वितीयः पाठः

# पाटलिपुत्रवैभवम्

**[ बिहारराज्यस्य राजधानीनगरं पाटलिपुत्रं सर्वेषु कालेषु महत्वमधारयत्। अस्येतिहासः सार्धसहस्रद्वयवर्षपरिमितः वर्तते। अत्र धार्मिकक्षेत्रं राजनीतिक्षेत्रम् उद्योगक्षेत्रं च विशेषेण ध्यानाकर्षकम्। वैदेशिकाः यात्रिणः मेगास्थनीज-फाह्यान-ह्वेनसांग-इत्सिंगप्रभृतयः पाटलिपुत्रस्य वर्णनं स्व-स्व संस्मरणग्रन्थेषु चक्रुः। पाठेऽस्मिन् पाटलिपुत्रवैभवस्य सामान्यः परिचयो वर्तते। ]**



प्राचीनेषु भारतीयेषु नगरेष्वन्यतमं पाटलिपुत्रमनुगङ्गं वसद्विचित्रं महानगरं बभूव। तद्विषये दामोदरगुप्तो नाम कविः कुट्टनीमताख्ये काव्ये कथयति-

**अस्ति महीतलतिलकं सरस्वतीकुलगृहं महानगरम् ।**
**नाम्ना पाटलिपुत्रं परिभूतपुरन्दरस्थानम् ॥**

(पद्य सं० 175)

इतिहासे श्रूयते यत् गङ्गायास्तीरे बुद्धकाले पाटलिग्रामः स्थितः आसीत् । यत्र च भगवान् बुद्धः बहुकृत्वः समागतः । तेन कथितमासीत् यद् ग्रामोऽयं महानगरं भविष्यति किन्तु कलहस्य अग्निदाहस्य जलपूरस्य च भयात् सर्वदाक्रान्तं भविष्यति । कालान्तरेण पाटलिग्रामः एव पाटलिपुत्रमिति कथितः । चन्द्रगुप्तमौर्यस्य काले अस्य नगरस्य शोभा रक्षाव्यवस्था च अत्युत्कृष्टासीदिति यूनानराजदूतः मेगास्थनीजः स्वसंस्मरणेषु निरूपयति । अस्य नगरस्य वैभवं प्रियदर्शिनः अशोकस्य समये सुतरां समृद्धम् ।

बहुकालं पाटलिपुत्रस्य प्राचीना सरस्वतीपरम्परा प्रावर्तत इति राजशेखरः स्वकाव्यमीमांसा-नामके कविशिक्षाप्रमुखे ग्रन्थे सादरं स्मरति

**अत्रोपवर्षवर्षाविह पाणिनिपिङ्गलाविह व्याडिः ।**
**वररुचिपतञ्जली इह परीक्षिताः ख्यातिमुपजग्मुः ॥**

कतिपयेषु प्राचीनसंस्कृतग्रन्थेषु पुराणादिषु पाटलिपुत्रस्य नामान्तरं पुष्पपुरं कुसुमपुरं वा प्राप्यते । अनेन ज्ञायते यत् नगरस्यास्य समीपे पुष्पाणां बहुलमुत्पादनं भवति स्म । पाटलिपुत्रमिति शब्दोऽपि पाटलपुष्पाणां पुत्तलिकारचनामाश्रित्य प्रचलितः । शरत्काले नगरेऽस्मिन् कौमुदीमहोत्सवः इति महान् समारोहः गुप्तवंशशासनकाले अतीव प्रचलितः । तत्र सर्वे जनाः आनन्दमग्नाः अभूवन् । सम्प्रति दुर्गापूजावसरे तादृशः एव समारोहः दृश्यते ।

कालचक्रवशाद् यद्यपि मध्यकाले पाटलिपुत्रं वर्षसहस्रपरिमितं जीर्णतामन्वभूत् । तस्य सङ्केतः अनेकेषु साहित्यग्रन्थेषु मुद्राराक्षसादिषु लभ्यते । मुगलवंशकाले अस्य नगरस्य समुद्धारो जातः । आंग्लशासनकाले च पाटलिपुत्रस्य सुतरां विकासो जातः । नगरमिदं मध्यकाले एव पटनेति नाम्ना प्रसिद्धिमगात् । अयं च शब्दः पत्तनमिति शब्दात् निर्गतः । नगरस्य पालिका देवी पटनदेवीति अद्यापि पूज्यते ।

सम्प्रति पाटलिपुत्रम् (पटना नाम नगरम्) अति विशालं वर्तते बिहारस्य राजधानी चास्ति । अनुदिनं नगरस्य विस्तारः भवति । अस्योत्तरस्यां दिशि गङ्गा नदी प्रवहति । तस्या उपरि गाँधीसेतुर्नाम एशियामहादेशस्य दीर्घतमः सेतुः किञ्च रेलयानसेतुरपि निर्मीयमानो वर्तते । नगरेऽस्मिन् उत्कृष्टः संग्रहालयः, उच्चन्यायालयः, सचिवालयः, गोलगृहम्, तारामण्डलम्, जैविकोद्यानम्, मौर्यकालिकः अवशेषः, महावीरमन्दिरम्-इत्येते दर्शनीयाः सन्ति । प्राचीनपटनानगरे सिखसम्प्रदायस्य पूजनीयं स्थलं दशमगुरोः गोविन्दसिंहस्य जन्मस्थानं गुरुद्वारेति नाम्ना प्रसिद्धं वर्तते । तत्र देशस्यास्य तीर्थयात्रिणः दर्शनार्थमायान्ति ।

एवं पाटलिपुत्रं प्राचीनकालात् अद्यावधि विभिन्नेषु क्षेत्रेषु वैभवं धारयति सर्वं च संकलितरूपेण संग्रहालये दर्शनीयमिति । पर्यटनमानचित्रे नगरमिदं महत्त्वपूर्णम् ।

## शब्दार्थाः

| | | | | |
|---|---|---|---|---|
| अन्यतमम् | – | एकतमम् | – | एक |
| मही | – | पृथ्वी | – | धरती |
| पुरन्दरः | – | इन्द्रः | – | इन्द्र |
| बहुकृत्वः | – | बहुशः कृत्वा | – | अनेक बार |
| आगतः | – | आगच्छत् | – | आया |
| आक्रान्तम् | – | संक्रान्तम् | – | घिरा |
| उत्कृष्टा | – | प्रकृष्टा | – | अच्छी |
| सुतराम् | – | अत्यधिकम् | – | और अधिक |
| प्रावर्तत | – | प्रचलिता | – | चलती थी |
| नामान्तरम् | – | अन्यत् नाम | – | दूसरा नाम |
| आश्रित्य | – | आधृत्य | – | आश्रय लेकर |
| अद्यावधि | – | अद्य पर्यन्तम् | – | आज तक |

## सन्धि विच्छेदः

| | | |
|---|---|---|
| नगरेष्वन्यतमम् | – | नगरेषु + अन्यतमम् |
| वसद्विचित्रम् | – | वसत् + विचित्रम् |
| गङ्गायास्तीरे | – | गङ्गायाः + तीरे |
| समागतः | – | सम् + आगतः |
| ग्रामोऽयम् | – | ग्रामः + अयम् |
| सर्वदाक्रान्तम् | – | सर्वदा + आक्रान्तम् |
| कालान्तरेण | – | काल + अन्तरेण |

| | | |
|---|---|---|
| अत्युत्कृष्टासीदिति | – | अति + उत्कृष्टा + आसीत् + इति |
| सादरम् | – | स + आदरम् |
| अत्रोपवर्षवर्षाविह | – | अत्र + उपवर्षवर्षौ + इह |
| पाणिनिपिङ्गलाविह | – | पाणिनिपिङ्गलौ + इह |
| नगरस्यास्य | – | नगरस्य + अस्य |
| पुष्पाश्रिता: | – | पुष्प + आश्रिता: |
| उत्सवाश्च | – | उत्सवा: + च |
| नगरेऽस्मिन् | – | नगरे + अस्मिन् |
| शब्दोऽपि | – | शब्द: + अपि |
| पटनेति | – | पटना + इति |
| निर्गत: | – | नि: + गत: |
| अस्योत्तरस्याम् | – | अस्य + उत्तरस्याम् |
| गाँधीसेतुर्नाम | – | गाँधीसेतु: + नाम |
| किञ्च | – | किम् + च |
| रेलयानसेतुरपि | – | रेलयानसेतु: + अपि |
| नगरेऽस्मिन् | – | नगरे + अस्मिन् |
| इत्येते | – | इति + एते |
| गुरुद्वारेति | – | गुरुद्वारा + इति |
| देशस्यास्य | – | देशस्य + अस्य |
| अद्यावधि | – | अद्य + अवधि |

ABSOL SOLUTIONS ABSOL PATNA

## प्रकृतिप्रत्ययविभागः

समागतः - सम् + आ + √गम् + क्त

स्थितः - √स्था + क्त

उत्कृष्टा - उत् + √कृष् + क्त + टाप्

निर्गतः - निः + √गम् + क्त

पूजनीयम् - √पूज् + अनीयर्

दर्शनीयम् - √दृश् + अनीयर्

आश्रित्य - आ + √श्रि + ल्यप्

## समासः

महानगरम् - महत् च तत् नगरम् (कर्मधारयः)

सरस्वतीकुलगृहम् - सरस्वत्याःकुलगृहम् (षष्ठी तत्पुरुषः)

महीतलतिलकम् - महीतलस्य तिलकम् (षष्ठी तत्पुरुषः)

कौमुदीमहोत्सवः - कौमुद्यां रचितः महोत्सवः (मध्यमपदलोपी समासः)

सचिवालयः - सचिवानाम् आलयः (षष्ठी तत्पुरुषः)

गोलगृहम् - गोलं तत् च गृहम् (कर्मधारयः)

तारामण्डलम् - ताराणां मण्डलानि सन्ति यस्मिन् तत् (बहुव्रीहिः)

## अभ्यासः

### (मौखिकः)

1. पाटलिपुत्रनगरस्य विषये द्वे वाक्ये संस्कृतभाषायां वदत।
2. अधोलिखितानां समस्तपदानां विग्रहं वदत-सचिवालयः, गोलगृहम्, महीतलतिलकम्, महानगरम्, सरस्वतीकुलगृहम्।

ABDIEL SOLUTIONS ABSOL PATNA

3. सन्धि-विच्छेदं वदत -

नगरेष्वन्यतमम्, ग्रामोऽयम्, कालान्तरेण, पटनेति, निर्गतः

## अभ्यासः
## ( लिखितः )

1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत -

(क) कुट्टनीमताख्यं काव्यं कस्य कवेः रचना अस्ति?

(ख) पाटलिपुत्रं कस्याः नद्याः तीरे अवस्थितमस्ति ?

(ग) चन्द्रगुप्तमौर्यस्य काले अस्य नगरस्य रक्षाव्यवस्था कीदृशी आसीत् ?

(घ) राज्ञः अशोकस्य समये अस्य नगरस्य वैभवं कीदृशम् आसीत् ?

(ङ) काव्यमीमांसानामकं ग्रन्थं कः अलिखत् ?

2. अधोलिखितानां शब्दानां सन्धिविच्छेदं कुरुत –

पाणिनिपिङ्गलाविह, अत्युत्कृष्टासीदिति, उत्सवाश्च, अस्योत्तरस्याम्, गाँधीसेतुर्नाम, नगरस्यास्य, पुष्पाश्रिता ।

3. सन्धिं कुरुत -

बहुलम् + उत्पादनम्

गङ्गायाः + तीरे

नगरे + अस्मिन्

च + अस्ति

शब्दः + अपि

सर्वदा + आक्रान्तम्

इति + एते

4. **अधोलिखितानां पदानां स्ववाक्येषु संस्कृते प्रयोगं कुरुत -**

यद्यपि, सम्प्रति, अतीव, महान्, नगरम्, अत्र

5. **रिक्तस्थानानि पूरयत -**

(क) गङ्गायाः उपरि गाँधीसेतुर्नाम ......... महादेशस्य दीर्घतमः सेतुः अस्ति। (अफ्रीका / एशिया)

(ख) पाटलिपुत्रनगरे प्रसिद्धं ...................... अस्ति। (गोलगृहम् / ताजमहलम्)

(ग) पाटलिपुत्रस्य नामान्तरं ................... प्राप्यते। (कुसुमपुरम् / माधवपुरम्)

(घ) कौमुदीमहोत्सवः ..................... अतीव प्रचलितः। (आङ्गलशासनकाले / गुप्तशासनकाले)

(ङ) पाटलिपुत्रस्य ................. दिशि गङ्गा नदी प्रवहति। (पूर्वस्याम् / उत्तरस्याम्)

(च) गोविन्दसिंहः सिखसम्प्रदायस्य ................. गुरुः आसीत्। (प्रथमः / दशमः)

6. **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधारीकृत्य प्रश्ननिर्माणं कुरुत -**

(क) तत्र <u>तीर्थयात्रिणः</u> दर्शनार्थमायान्ति।

(ख) <u>मध्यकाले</u> पाटलिपुत्रं वर्षसहस्रपरिमितं जीर्णतामन्वभूत्।

(ग) मुगलकाले <u>पाटलिपुत्रस्य</u> समुद्धारो जातः।

(घ) तत्र सर्वे जनाः <u>आनन्दमग्नाः</u> अभूवन्।

(ङ) तत्र <u>भगवान् बुद्धः</u> बहुकृत्वः समागतः।

(च) नगरस्य शोभा <u>अशोकस्य</u> समये सुतरां समृद्धम्।

7. **रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं लिखत -**

(क) <u>काले-काले</u> उत्सवाः भवन्ति स्म।

(ख) <u>तस्य</u> सङ्केतः अनेकेषु ग्रन्थेषु लभ्यते।

(ग) <u>नगरम्</u> इदं पटनेति नाम्ना प्रसिद्धिमगात्।

(घ) <u>कौमुदीमहोत्सवः</u> महान् समारोहः आसीत्।

(ङ) <u>दुर्गापूजावसरे</u> तादृशः एव समारोहः दृश्यते।

8. स्तम्भद्वये लिखितानां शब्दानां मेलनं कुरुत–

| (क) | | (ख) |
|---|---|---|
| मही | – | आगच्छत् |
| सुतराम् | – | इन्द्रः |
| पुरन्दरः | – | पृथ्वी |
| अन्यतमम् | – | अत्यधिकम् |
| उत्कृष्टा | – | एकतमम् |
| आगतः | – | प्रकृष्टा |

## योग्यताविस्तारः

पाटलिपुत्रम् इतिहासस्य प्रारम्भिककालतः धार्मिक-सांस्कृतिक-राजनीतिक-आर्थिक-वैदेशिक-नीतिदृष्ट्या अत्यन्तं महत्त्वपूर्णं स्थानं धत्ते। भारतस्य महान् सम्राट् अशोकः अत्रैव जातः आसीत्। तस्य सम्बन्धे इयं प्रसिद्धिः वर्तते यत् सः स्वकीयान् नवनवतिं भ्रातृन् हत्वा राजसिंहासने समारूढ़ः। हतानां भ्रातृणां प्रक्षेपणं यस्मिन् कूपे कृतवान् आसीत् स एव कूपः अधुना ''अगमकुआँ'' इति नाम्ना प्रसिद्धः।

## क्रियानुशीलनम्

(क) पाटलिपुत्रस्य अतीतं ज्ञातुं इतिहासशिक्षकस्य सहयोगेन पाटलिपुत्रस्य सिन्हा लाइब्रेरी, खुदाबख्श लाइब्रेरी, काशीप्रसाद जायसवाल संस्थान-गाँधीसंग्रहालय-पटना विश्वविद्यालय पुस्तकालयप्रभृतिपुस्तकालयेषु भ्रमणं कृत्वा ऐतिहासिकतथ्यानां पुरातात्त्विकतथ्यानां च संग्रहःकरणीयः।

(ख) कुम्हरार-खगोल-तरेगना-सबलपुर-मनेर-दीघा-महेन्द्रूघाट-राजगीरादिस्थानेषु शैक्षणिकभ्रमणं करणीयं तथा च एतेषां स्थानानाम् ऐतिहासिकतथ्यैः सह ज्योतिष-खगोल-विज्ञानसम्मततथ्यानि संग्रहणीयानि।

(ग) संस्कृतसाहित्यस्यापि योगदाने पाटलिपुत्रस्य महत् योगदानम् अस्ति। पतञ्जलि -कात्यायन-चाणक्य-वर्षोपवर्षप्रभृतीनाम् आचार्याणां प्रशंसनीया परम्परा संस्कृतसाहित्यस्य अनुसंधानेन ज्ञातव्या।

(घ) भारतीयस्वतन्त्रतासंग्रामस्य हुतात्मनां स्वातन्त्र्यवीराणां चित्रावली संग्रहणीया तस्याः प्रदर्शनी च आयोजनीया।

□

य इदानीं जलार्द्रैर्वासोभिः कटैर्वास्मान् प्रावृणोति ? चतुर्थेनोक्तम् - अये वाचालाः। कति वचनानि वक्तुं शक्नुथ ? तूष्णीं कथं न तिष्ठथ ?

ततश्चतुर्णामपि तेषामेवं परस्परालापं श्रुत्वा वह्निं च प्रवृद्धमेषामुपरि पतिष्यन्तं दृष्ट्वा नियोगिपुरुषैर्वधभयेन चत्वारोऽप्यलसाः केशेष्वावाकृष्य गृहीत्वा गृहाद् बहिःकृताः। पश्चात्तानालोक्य तैर्नियोगिभिः पठितम्-

**पतिरेव गतिः स्त्रीणां बालानां जननी गतिः।**
**नालसानां गतिः काचिल्लोके कारुणिकं बिना॥**

पश्चात्तेषु चतुर्ष्वलसेषु ततोऽप्यधिकतरं वस्तु मन्त्री दापयामास।

## शब्दार्थाः

| | | | | |
|---|---|---|---|---|
| अलसः | - | अकर्मण्यः | - | आलसी |
| कारुणिकः | - | दयालुः | - | दयावान |
| दुर्गतिभ्यः | - | निर्धनेभ्यः | - | संकटग्रस्तों को |
| प्रत्यहम् | - | प्रतिदिनम् | - | प्रतिदिन |
| रिपुः | - | अरिः | - | शत्रु |
| जाठरेण | - | उदरसम्बद्धेन | - | उदर से सम्बद्ध |
| तुन्दपरिमृजाः | - | उदरवर्धकाः | - | तोंद बढ़ाने वाले |
| सौकर्यमूला | - | सौविध्यमूला | - | सुविधाजनक |
| सजातीनाम् | - | स्वजातीनाम् | - | अपनी जातियों का |
| कृत्रिममालस्यम् | - | स्वनिर्मितम् आलस्यम् | - | बनावटी आलस्य |
| बहुद्रव्यव्ययम् | - | अधिकधनव्ययः | - | अधिक धन का खर्च |
| परामृष्टम् | - | विचारितम् | - | विचार किया गया |
| बुद्ध्या | - | मत्या | - | बुद्धि से |
| प्रमादः | - | आलस्यम् | - | आलस्य |

| | | |
|---|---|---|
| परामृश्य – | विचार्य – | विचार करके |
| प्रसुप्तः – | सुप्तः – | सोया हुआ |
| वह्निम् – | अग्निम् – | अग्नि को, आग |
| दापयति – | दानं कारयति – | दिलवाता है |
| गृहलग्नम् – | गेहलिप्तम् – | घर में लगी |
| प्रवृद्धम् – | प्रवर्द्धमानम् – | फैली हुई, बढ़ी हुई |
| ईषत् – | स्तोकम् – | थोड़ा |
| जलार्द्रैः – | नीरेण आर्द्रैः – | जल से आर्द्र |
| कटैः – | आस्तरैः – | चटाई, आसनों से |
| प्रावृणोति – | आच्छादयति – | ढँकता है |
| तूष्णीम् – | मौनम् – | मौन |
| आलापम् – | वार्त्ताम् – | बातचीत |
| आकृष्य – | समीपम् आनीय – | खींच करके |
| आलोक्य – | दृष्ट्वा – | देखकर |

## सन्धिविच्छेदः

| | |
|---|---|
| विद्यापतिरासीत् | – विद्यापतिः + आसीत् |
| व्यंग्यात्मिका | – व्यंग्य + आत्मिका |
| दुर्गतेभ्योऽनाथेभ्यश्च | – दुर्गतेभ्यः + अनाथेभ्यः + च |
| प्रत्यहमिच्छाभोजनम् | – प्रत्यहम् + इच्छाभोजनम् |
| अलसेभ्योऽप्यन्नवस्त्रे | – अलसेभ्यः + अपि + अन्नवस्त्रे |
| जाठरेणाऽपि | – जाठरेण + अपि |
| ततोऽलसपुरुषाणाम् | – ततः + अलसपुरुषाणाम् |
| पश्चादलसानाम् | – पश्चात् + अलसानाम् |

तदनन्तरमलसशालायाम् - तदनन्तरम् + अलसशालायाम् (तत् + अनन्तरम्)

यदक्षमबुद्ध्या - यत् + अक्षमबुद्ध्या

तदालसपुरुषाणाम् - तदा + अलसपुरुषाणाम्

पश्चादीषदलसा: - पश्चात् + ईषत् + अलसा:

अग्निर्लग्नोऽस्ति - अग्नि: + लग्न: + अस्ति

तृतीयेनोक्तम् - तृतीयेन + उक्तम्

जलार्द्रैर्वासोभि: - जलार्द्रै: + वासोभि:

ततश्चतुर्णामपि - तत: + चतुर्णाम् + अपि

ततोऽप्यधिकतरम् - तत: + अपि + अधिकतरम्

कारुणिकश्च - कारुणिक: + च

तन्मध्ये - तत् + मध्ये

तन्नियोगिपुरुषै: - तत् + नियोगिपुरुषै:

किञ्चिन्न - किम् +चित् + न

काचिल्लोके - काचित् + लोके

तत्रेष्टलाभम् - तत्र + इष्टलाभम्

निर्मातापि - निर्माता + अपि

## समास:

अक्षमबुद्ध्या - अक्षम: बुद्ध्या (कर्मधारय तत्पुरुष)

मैथिलीकवि: - मैथिलीभाषाया: कवि: (षष्ठी तत्पुरुष)

नीतिकारा: - नीतिं कुर्वन्ति (उपपद समास)

पुरुषपरीक्षा - पुरुषस्य परीक्षा (षष्ठी तत्पुरुष)

मानवगुणानाम् - मानवस्य गुणानाम् (षष्ठी तत्पुरुष)

जलार्द्रै: - जलेन आर्द्रै: (तृतीया तत्पुरुष)

नियोगिपुरुषै: - नियोगिभि: पुरुषै: (कर्मधारय)

बहुद्रव्यव्ययम् - बहुद्रव्याणां व्ययम् (षष्ठी तत्पुरुष)

## अभ्यासः
### ( मौखिकः )

1. अधोलिखितानां प्रश्नानाम् उत्तराणि वदत –

(क) इयं कथा कस्मात् ग्रन्थात् उद्धृताऽस्ति ?

(ख) अस्यां कथायां कस्य महत्त्वम् वर्णितम् अस्ति ?

(ग) अस्याः कथायाः रचनाकारः कः ?

(घ) इयं कथा किं शिक्षयति ?

(ङ) विद्यापतिः कः आसीत् ?

(च) अस्यां कथायां कस्य दोषस्य वर्णनम् अस्ति ?

(छ) मिथिलायाः मन्त्री कः आसीत् ?

(ज) कं दृष्ट्वा सर्वे धूर्ताः पलायिताः ?

(झ) अलसशालायां बहुद्रव्यव्ययं दृष्ट्वा तन्नियोगिपुरुषैः किं परामृष्टम् ?

2. अधोलिखितानां प्रश्नानाम् उत्तरम् एकशब्देन दत्त –

(क) अग्निं दृष्ट्वा के पलायिताः ?

(ख) कति पुरुषाः सुप्ता आसन् ?

(ग) एकः पुरुषः किम् अवदत् ?

(घ) द्वितीयः पुरुषः किम् अवदत् ?

(ङ) तृतीयः पुरुषः किम् अवदत् ?

(च) चतुर्थः पुरुषः किम् अवदत् ?

(छ) वीरेश्वरः कः आसीत् ?

(ज) तस्य स्वभावः कीदृशः आसीत् ?

(झ) अलसानां सुखं दृष्ट्वा के कृत्रिमालस्यं दर्शयित्वा भोजनं गृहणन्ति स्म ?

ABDIEL SOLUTIONS ABSOL PATNA

## अभ्यासः
## ( लिखितः )

1. **रिक्तस्थानानि पूरयत –**

(क) स्थितिः ........................ धावन्ति जन्तवः।

(ख) निर्गतीनां ........................ वह्निना।

(ग) कपटेनाऽनलसा अपि गृह्णन्ति इत्यस्माकं ..................।

(घ) विद्यापतिः लोकप्रियः ........................ आसीत्।

(ङ) नीतिकाराः आलस्यं ........................ मन्यन्ते।

(च) आसीत् मिथिलायां ........................ नाम मन्त्री।

(छ) पश्चादलसानां सुखं दृष्ट्वा धूर्त्ता अपि कृत्रिममालस्यं दर्शयित्वा ........................ गृह्णन्ति।

2. **एकपदेन उत्तरत –**

(क) अलसकथायाः कथाकारः कः ?

(ख) वीरेश्वरो नाम मन्त्री कुत्र आसीत् ?

(ग) केषाम् इष्टलाभं कृत्वा तुन्दपरिमृजा वर्तुलीबभूवुः ?

(घ) के कृत्रिमालस्यं दर्शयित्वा भोजनं गृह्णन्ति ?

(ङ) तत्रैव कति पुरुषाः सुप्ताः ?

3. **पूर्णवाक्येन उत्तराणि दत्त –**

(क) मिथिलायां कः मन्त्री आसीत् ?

(ख) वीरेश्वरो नाम मन्त्री केभ्यः स्वरुचिभोजनं दापयति स्म ?

(ग) भीषणबुभुक्षया अपि कः किमपि कर्त्तुं न क्षमते ?

(घ) धूर्त्ताः किं दृष्ट्वा पलायनं कृतवन्तः ?

(ङ) चत्वारः अलसाः कैः बहिष्कृताः ?

(च) अलसानां कः शरणदः ?

(छ) जन्तवः केषाम् सुखं दृष्ट्वा धावन्ति ?

**4. उदाहरणम् अनुसृत्य पदनिर्माणं क्रियताम् –**

उदाहरणम् – प्रश्नः- अलस + ष्यञ् =

उत्तरम् – आलस्यम्

(क) करुण + ष्यञ् = .............................. ।

(ख) बहुल + ष्यञ् = .............................. ।

(ग) प्रधान + ष्यञ् = .............................. ।

(घ) सरल + ष्यञ् = .............................. ।

(ङ) तरुण + ष्यञ् = .............................. ।

(च) कठिन + ष्यञ् = .............................. ।

(छ) वत्सल + ष्यञ् = .............................. ।

**5. उदाहरणम् अनुसृत्य क्रियापदानि लिखत –**

उदाहरणम् – प्रश्नः – ददाति इत्यस्य प्रेरणार्थके ................ क्रियापदं भवति।

उत्तरम् – दापयति।

(क) पश्यति इत्यस्य प्रेरणार्थके .................... क्रियापदं भवति।

(ख) करोति इत्यस्य प्रेरणार्थके .................... क्रियापदं भवति।

(ग) खादति इत्यस्य प्रेरणार्थके .................... क्रियापदं भवति।

(घ) पठति इत्यस्य प्रेरणार्थके .................... क्रियापदं भवति।

(ङ) गच्छति इत्यस्य प्रेरणार्थके .................... क्रियापदं भवति।

**6. उदाहरणम् अनुसृत्य प्रश्ननिर्माणं क्रियताम् –**

उदाहरणम् – वीरेश्वरः <u>कारुणिकः</u> मन्त्री आसीत्।

प्रश्नः – वीरेश्वरः कीदृशः मन्त्री आसीत् ?

(क) धूर्ताः कृत्रिमालस्यं दर्शयित्वा <u>भोजनम्</u> प्राप्नुवन्ति।

(ख) निर्गतीनां प्रथमः <u>अलसः</u> अस्ति।

(ग) **अलसः** जाठरेणाऽपि वह्निना किमपि कर्तुं न क्षमते।

(घ) नियोगिपुरुषाः **अलसशालायां** वह्निं दापयित्वा निरूपयामासुः।

(ङ) **स्त्रीणां** गतिः पतिरेव।

(च) **बालानां** गतिः जननी।

(छ) कारुणिकः **अलसानां** गतिः।

## योग्यताविस्तारः

अस्य पाठस्य अयं सन्देशः अस्ति यत् आलस्यं महान् रोगः अस्ति। अलसस्य सहायकः प्रायः कोऽपि नैव भवति। अतः जीवने आलस्यं सर्वथा त्याज्यम्। आलस्यस्य सम्बन्धे नीतिश्लोकः कथयति–

**आलस्यं हि मनुष्याणां, शरीरस्थो महारिपुः।**
**नास्त्युद्यमसमो बन्धुः, कृत्वा यं नावसीदति॥**

कथनस्य तात्पर्यम् अस्ति शरीरे स्थितः शत्रुः आलस्यम् अस्ति। मनुष्यशरीरे आलस्यशत्रु-विनाशाय उद्यमः (परिश्रमः) नाम मित्रम् अपि अस्ति। सम्प्रति विद्यार्थी स्वयमेव चिन्तयतु। मनुष्यः यदि जीवने उन्नतिं विकासं वा इच्छति तर्हि आलस्यं त्यक्त्वा उद्यमं करोतु।

पुनः कथितम् –

**षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता।**
**निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता॥**

## क्रियानुशीलनम् :-

(क) स्वपरिवेशे तेषां बालकानां सूची करणीया, ये अलसाः सन्ति।

(ख) परिवेशे परिश्रमशीलानां जनानां बालानां च सूची करणीया।

(ग) एका गोष्ठी करणीया, यत्र आलस्यकारणात् जायमानानां हानीनां चर्चा करणीया। पुनश्च परिश्रमबलेन एकः निर्बलः निर्धनः निर्विद्यश्च केन प्रकारेण सबलः सधनः, सविद्यश्च अभवत् इति प्रकारकं कथानकं कथनीयम्।

□

चतुर्थः पाठः

# संस्कृतसाहित्ये लेखिकाः

PATNA

**[ समाजस्य यानं पुरुषैः नारीभिश्च चलति। साहित्येऽपि उभयोः समानं महत्त्वम्। अधुना सर्वभाषासु साहित्यरचनायां स्त्रियोऽपि तत्पराः सन्ति यशश्च लभन्ते। संस्कृतसाहित्ये प्राचीनकालादेव साहित्यसमृद्धौ योगदानं न्यूनाधिकं प्राप्यते। पाठेऽस्मिन्नतिप्रसिद्धानां लेखिकानामेव चर्चा वर्तते येन साहित्यनिधिपूरणे तासां योगदानं ज्ञायेत।]**

विपुलं संस्कृतसाहित्यं विभिन्नैः कविभिः शास्त्रकारैश्च संवर्धितम्। वैदिककालादारभ्य शास्त्राणां काव्यानाञ्च रचने संरक्षणे च यथा पुरुषाः दत्तचित्ताः अभवन् तथैव स्त्रियोऽपि दत्तावधानाः प्राप्यन्ते। वैदिकयुगे मन्त्राणां दर्शका न केवला ऋषयः, प्रत्युत ऋषिका अपि सन्ति। ऋग्वेदे चतुर्विंशतिरथर्ववेदे च पञ्च ऋषिकाः मन्त्रदर्शनवत्यो निर्दिश्यन्ते यथा-यमी, अपाला, उर्वशी, इन्द्राणी, वागाम्भृणी इत्यादयः।

बृहदारण्यकोपनिषदि याज्ञवल्क्यस्य पत्नी मैत्रेयी दार्शनिकरुचिमती वर्णिता यां याज्ञवल्क्य आत्मतत्त्वं शिक्षयति। जनकस्य सभायां शास्त्रार्थकुशला गार्गी वाचक्नवी तिष्ठति स्म। महाभारतेऽपि जीवनपर्यन्तं वेदान्तानुशीलनपरायाः सुलभाया वर्णनं लभ्यते।

लौकिकसंस्कृतसाहित्ये प्रायेण चत्वारिंशत्कवयित्रीणां सार्धशतं पद्यानि स्फुटरूपेण इतस्ततो लभ्यन्ते। तासु विजयाङ्का प्रथम-कल्पा वर्तते। सा च श्यामवर्णासीदिति पद्येनानेन स्फुटीभवति-

नीलोत्पलदलश्यामां विजयाङ्कामजानता।
वृथैव दण्डिना प्रोक्ता 'सर्वशुक्ला सरस्वती'॥

तस्याः कालः अष्टमशतकमित्यनुमीयते। चालुक्यवंशीयस्य चन्द्रादित्यस्य राज्ञी विजयभट्टारिकैव विजयाङ्का इति बहवो मन्यते। किञ्च शीला भट्टारिका, देवकुमारिका, रामभद्राम्बा-प्रभृतयो दक्षिणभारतीयाः संस्कृतलेखिकाः स्वस्फुटपद्यैः प्रसिद्धाः।

विजयनगरराज्यस्य नरेशाः संस्कृतभाषासंरक्षणाय कृतप्रयासा आसन्निति विदितमेव। तेषामन्तःपुरेऽपि संस्कृतरचनाकुशलाः राज्ञ्योऽभवन्। कम्पणरायस्य (चतुर्दशशतकम्) राज्ञी गङ्गादेवी 'मधुराविजयम्' इति महाकाव्यं स्वस्वामिनो (मदुरै)-विजयघटनामाश्रित्यारचयत्। तत्रालङ्काराणां संनिवेशः आवर्जको वर्तते। तस्मिन्नेव राज्ये षोडशशतके शासनं कुर्वतः अच्युतरायस्य राज्ञी तिरुमलाम्बा वरदाम्बिकापरिणय-नामकं प्रौढं चम्पूकाव्यमरचयत्। तत्र संस्कृतगद्यस्य छटा समस्तपदावल्या ललितपदविन्यासेन चातीव शोभते। संस्कृतसाहित्ये प्रयुक्तं दीर्घतमं समस्तपदमपि तत्रैव लभ्यते।

आधुनिककाले संस्कृतलेखिकासु पण्डिता क्षमाराव (1890-1953 ई०) नामधेया विदुषी अतीव प्रसिद्धा। तया स्वपितुः शंकरपाण्डुरंगपण्डितस्य महतो विदुषो जीवनचरितं 'शङ्करचरितम्' इति रचितम्। गान्धिदर्शनप्रभाविता सा सत्याग्रहगीता, मीरालहरी, कथामुक्तावली, विचित्रपरिषद्यात्रा, ग्रामज्योतिः इत्यादीन् अनेकान् गद्य-पद्यग्रन्थान् प्रणीतवती। वर्तमानकाले लेखनरतासु कवयित्रीषु पुष्पादीक्षित-वनमाला भवालकर-मिथिलेश कुमारी मिश्र-प्रभृतयोऽनुदिनं संस्कृतसाहित्यं पूरयन्ति।

## शब्दार्थाः

| | | | | |
|---|---|---|---|---|
| अधुना | - | अस्मिन् समये | - | इस समय |
| उभयोः | - | द्वयोः | - | दोनों का |
| लभन्ते | - | प्राप्नुवन्ति | - | प्राप्त करते हैं |
| तत्पराः | - | उत्सुकाः | - | उत्सुक रहते हैं |
| ज्ञायते | - | अवगम्यते | - | ज्ञात होता है |
| विपुलम् | - | प्रभूतम् | - | अत्यधिक |
| संवर्धितम् | - | वृद्धिम् आनीतम् | - | बढ़ाया गया |
| आरभ्य | - | उपक्रम्य | - | प्रारंभ करके |
| वैदिकयुगे | - | वेदस्य काले | - | वेद के काल में |
| ऋषयः | - | मन्त्रद्रष्टारः | - | ऋषि |

| | | | | |
|---|---|---|---|---|
| निर्दिश्यन्ते | – | उल्लिख्यन्ते | – | उल्लेखित किये जाते हैं |
| स्फुटरूपेण | – | स्पष्टरूपेण | – | स्पष्ट रूप से |
| इतस्ततः | – | अस्मात् स्थानात् तत् स्थानं प्रति | – | इधर-उधर |
| वृथैव | – | व्यर्थम् | – | बेकार |
| प्रोक्ता | – | कथिता | – | कही गयी |
| अनुमीयते | – | अनुमानं क्रियते | – | अनुमान किया जाता है |
| प्रभृतयः | – | आदयः | – | आदि |
| विदितमेव | – | ज्ञातमेव | – | ज्ञात ही है। |
| अरचयत् | – | रचनां कृतवती | – | रचना की |
| पूरयन्ति | – | पूर्तिं कुर्वन्ति | – | पूर्ण करते हैं। |

## सन्धिविच्छेदः

| | | |
|---|---|---|
| स्त्रियोऽपि | – | स्त्रियः + अपि |
| प्राचीनकालादेव | – | प्राचीनकालात् + एव |
| न्यूनाधिकम् | – | न्यून + अधिकम् |
| पाठेऽस्मिन्नतिप्रसिद्धानाम् | – | पाठे + अस्मिन् + अतिप्रसिद्धानाम् |
| दत्तावधानम् | – | दत्त + अवधानम् |
| चतुर्विंशतिरथर्ववेदे | – | चतुर्विंशतिः + अथर्ववेदे |
| बृहदारण्यकोपनिषदि | – | बृहदारण्यक + उपनिषदि |
| वेदान्तानुशीलनपरायाः | – | वेदान्त + अनुशीलनपरायाः |
| अष्टमशतकमित्यनुमीयते | – | अष्टमशतकम् + इति + अनुमीयते |

ABDIEL SOLUTIONS ABSOL PATNA

| | | |
|---|---|---|
| विजयभट्टारिकैव | - | विजयभट्टारिका + एव |
| तत्रालङ्काराणाम् | - | तत्र + अलङ्काराणाम् |
| प्रभृतयोऽनुदिनम् | - | प्रभृतयः + अनुदिनम् |
| इत्यादयः | - | इति + आदयः |
| तत्रैव | - | तत्र + एव |
| तस्मिन्नेव | - | तस्मिन् + एव |
| आसन्निति | - | आसन् + इति |
| प्रोक्ता | - | प्र + उक्ता |
| वृथैव | - | वृथा + एव |
| इतस्ततो | - | इतः + ततः |
| श्यामवर्णासीदिति | - | श्यामवर्णा + आसीत् + इति |
| काव्यानाञ्च | - | काव्यानाम् + च |
| वैदिककालादारभ्य | - | वैदिककालात् + आरभ्य |

## समासः

| | | |
|---|---|---|
| संस्कृतसाहित्ये | - | संस्कृतस्य साहित्ये (षष्ठी तत्पुरुषः) |
| प्राचीनकालात् | - | प्राचीनः चासौ कालः तस्मात् (कर्मधारयः) |
| वैदिकयुगे | - | वैदिकं तच्च युगं तस्मिन् (कर्मधारयः) |
| आत्मतत्त्वम् | - | आत्मनः तत्त्वम् (षष्ठी तत्पुरुषः) |
| स्वस्वामिनः | - | स्वस्य स्वामिनः (षष्ठी तत्पुरुषः) |
| जीवनचरितम् | - | जीवनस्य चरितम् (षष्ठी तत्पुरुषः) |
| स्वपितुः | - | स्वस्य पितुः (षष्ठी तत्पुरुषः) |

| | | |
|---|---|---|
| नीलोत्पलम् | - | नीलम् तच्च उत्पलम् (कर्मधारय:) |
| शास्त्रार्थकुशला | - | शास्त्रार्थे कुशला (सप्तमी तत्पुरुष:) |
| साहित्यनिधिपूरणे | - | साहित्यनिधे: पूरणे (षष्ठी तत्पुरुष:) |
| संस्कृतलेखिका: | - | संस्कृतस्य लेखिका: (षष्ठी तत्पुरुष:) |
| विजयनगरराज्यस्य | - | विजयनगरं नाम राज्यम्, तस्य (मध्यमपदलोपी तत्पुरुष:) |
| संस्कृतरचनाकुशला: | - | संस्कृतरचनायां कुशला: (सप्तमी तत्पुरुष:) |
| गान्धिदर्शनप्रभाविता | - | गान्धिदर्शनेन प्रभाविता (तृतीया तत्पुरुष:) |

## अभ्यास:
### ( मौखिक: )

1. **एकपदेन उत्तरं वदत –**

(क) विपुलं किम् अस्ति ?

(ख) विपुलं संस्कृतसाहित्यं कै: संवर्द्धितम् ?

(ग) काव्यानाम् रचने संरक्षणे च का: दत्तावधाना: ?

(घ) गङ्गादेवी किं महाकाव्यम् अरचयत् ?

(ङ) आधुनिकसंस्कृतलेखिकासु का प्रसिद्धा ?

2. **पदार्थं वदत ?**

(क) ''लभ्यन्ते'' इत्यस्य क: अर्थ: ?

(ख) ''इन्द्राणी'' इत्यस्य क: अर्थ: ?

(ग) ''वर्तते'' इत्यस्य क: अर्थ: ?

(घ) ''विपुलम्'' इत्यस्य क: अर्थ: ?

(ङ) ''ऋषिका'' इत्यस्य क: अर्थ: ?

ABDIEL SOLUTIONS ABSOL PATNA

## अभ्यासः

### ( लिखितः )

1. एकपदेन उत्तरं दत्त –

(क) कस्मिन् युगे मन्त्राणां दर्शका न केवला ऋषयः प्रत्युत ऋषिका अपि सन्ति ?

(ख) वागाम्भृणी कुत्र ऋषिका निर्दिश्यते ?

(ग) यावल्क्यस्य पत्नी का आसीत् ?

(घ) कस्य सभायां शास्त्रार्थकुशला गार्गी वाचक्नवी तिष्ठति स्म ?

(ङ) लौकिकसंस्कृतसाहित्ये चत्वारिंशत्कवयित्रीणां प्रथमकल्पा का वर्तते ?

(च) लौकिकसंस्कृतसाहित्ये कियतीनां कवयित्रीणां वर्णनं लभ्यते ?

(छ) विजयभट्टारिका कस्य राज्ञी आसीत् ?

2. अधोलिखितानि रिक्तस्थानानि पूरयत -

(क) बृहदारण्यकोपनिषदि याज्ञवल्क्यस्य पत्नी ...................... वर्णिता।

(ख) जनकस्य सभायां शास्त्रार्थकुशला ...................... वाचक्नवी तिष्ठति स्म।

(ग) लौकिकसंस्कृतसाहित्ये प्रायेण ...................... कवयित्रीणां सार्धशतं पद्यानि लभ्यन्ते।

(घ) तासु ...................... प्रथमकल्पा वर्तते।

(ङ) सा च ...................... वर्णासीदिति।

(च) चन्द्रादित्यस्य राज्ञी ...................... एव विजयाङ्का इति मन्यन्ते।

(छ) षोडशशतके अच्युतरायस्य राज्ञी तिरुमलाम्बा ...................... नामक प्रौढं चम्पूकाव्यम् अरचयत्।

3. अधोलिखितप्रश्नानाम् उत्तराणि पूर्णवाक्येन संस्कृतभाषया दत्त -

(क) ऋग्वेदे कति ऋषिका: मन्त्रदर्शनवत्यो निर्दिश्यन्ते ?

(ख) याज्ञवल्क्यस्य पत्नी केन रूपेण वर्णिता ?

(ग) याज्ञवल्क्य: तां किं शिक्षयति ?

(घ) विजयाङ्काया: वर्ण: क: आसीत् ?

(ङ) तिरुमलाम्बा कस्य चम्पूकाव्यस्य रचनां कृतवती ?

(च) शङ्करचरितम् इति जीवनचरितस्य रचयित्री का ?

4. उदाहरणानुसारं पर्यायवाचिपदानि लिखत -

उदाहरणम् - प्रश्न: - 'विशालम्' इत्यस्य पर्यायपदम् किम् ?

'विशालम्' इत्यस्य ''विपुलम्'' पर्यायपदम्

प्रश्ना:

(क) वृथा इत्यस्य .................. पर्यायपदम्।

(ख) तत्परा: इत्यस्य .................. पर्यायपदम्।

(ग) वर्तते इत्यस्य .................. पर्यायपदम्।

(घ) ख्याता: इत्यस्य .................. पर्यायपदम्।

(ङ) ज्ञातमेव इत्यस्य .................. पर्यायपदम्।

(च) भार्या इत्यस्य .................. पर्यायपदम्।

(छ) जननी इत्यस्य .................. पर्यायपदम्।

5. अधोलिखितै:पदै: वाक्यानि रचयत -

(क) सभायाम्

(ख) प्रथमकल्पा

(ग) लभ्यते

(घ) ऋषयः

(ङ) शास्त्राणाम्

6. **उदाहरणम् अनुसृत्य स्त्रीप्रत्यययोगेनशब्दं रचयत -**

उदाहरण - कारक + टाप् - ..........................

उत्तरम् - कारिका

(क) लेखक + टाप् = ................................।

(ख) नायक + टाप् = ................................।

(ग) वाचक + टाप् = ................................।

(घ) विधायक + टाप् = ................................।

(ङ) योजक + टाप् = ................................।

(च) धारक + टाप् = ................................।

(छ) पालक + टाप् = ................................।

(ज) गायक + टाप् = ................................।

ADIEL SOLUTIONS ABSOL PATNA

7. **उदाहरणम् अनुसृत्य रेखांकितपदानां स्थाने अन्यपदानि योजयत -**

उदाहरणम् - प्रश्नः-1 जनकस्य सभायां गार्गी तिष्ठतिस्म ।

उत्तरम्-1 जनकस्य सभायां गार्गी अतिष्ठत्।

प्रश्नः- 2 ते पठन्ति स्म

उत्तरम्- 2 ते अपठन्

(क) बालकः प्रतिदिनं विद्यालयं गच्छति स्म।

(ख) छात्राः सायंकाले क्षेत्रे क्रीडन्ति स्म।

(ग) अध्यापकाः वर्गेषु पाठयन्ति स्म।

(घ) गजाः वने भ्रमन्ति स्म।

(ङ) कोकिलाः वृक्षशाखासु कूजन्ति स्म।

(च) वानराः तरुशिखरेषु कूर्दन्ति स्म।

## योग्यताविस्तारः

अनेन पाठेन संस्कृतसाहित्यस्य विकासे महिलानां योगदानस्य चर्चा कृता अस्ति। अस्य पाठस्य सन्देशः अयमस्ति यत् वैदिकयुगतः आधुनिकसमयं यावत् ऋषिकाः, कवयित्र्यः, लेखिकाश्च संस्कृतसाहित्यं संवर्द्धयन्त्यः सन्ति। संस्कृतलेखिकानां सुदीर्घा परम्परा वर्तते। अनुसन्धानेन तथ्यमिदं स्पष्टं भवति यत् महिला अपि पुरुषैः सह संस्कृतस्य सेवां कृतवत्यः।

## कार्यानुशीलनम्

(क) 'गीता प्रेस' गोरखपुरतः प्रकाशिते वेदकथाङ्के ऋषिकाणां वर्णनं दृश्यते। ततः तासाम् अतिरोचकं कथानकं संकलयत ।

(ख) गार्गी-मैत्रेयी-याज्ञवल्क्यानां शास्त्रीयसंवादः प्रख्यातः। तस्य संवादस्य सारांशं संस्कृतशिक्षकस्य सहयोगेन लिखत।

(ग) संस्कृतशिक्षकस्य पुस्तकालयाध्यक्षस्य च सहयोगेन पुस्तकालये संस्कृतलेखिकानां सूची करणीया, तासां रचनानां च मूलभावः लेखनीयः।

□

ABDIEL SOLUTIONS ABSOL PATNA

पञ्चमः पाठः

# भारतमहिमा

( अस्माकं देशः भारतवर्षमिति कथ्यते। अस्य महिमा सर्वत्र गीयते। पाठेऽस्मिन् विष्णुपुराणात् भागवतपुराणात् च प्रथमं द्वितीयं च क्रमशः पद्यं गृहीतमस्ति। अवशिष्टानि पद्यान्यध्यक्षेण निर्मीय प्रस्तावितानि। भारतं प्रति भक्तिरस्माकं कर्तव्यरूपेण वर्तते। )

## पौराणिकी

गायन्ति देवाः किल गीतकानि धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात्॥

अहो अमीषां किमकारि शोभनं
प्रसन्न एषां स्विदुत स्वयं हरिः।
यैर्जन्म लब्धं नृषु भारताजिरे
मुकुन्दसेवौपयिकं स्पृहा हि नः॥

## आधुनिकी

इयं निर्मला वत्सला मातृभूमिः
प्रसिद्धं सदा भारतं वर्षमेतत्।
विभिन्ना जना धर्मजातिप्रभेदै-
रिहैकत्वभावं वहन्तो वसन्ति॥

विशालास्मदीया धरा भारतीया
सदा सेविता सागरै रम्यरूपा।
वनैः पर्वतैर्निर्झरैर्भव्यभूति-
र्वहन्तीभिरेषा शुभा चापगाभिः॥

जगद्गौरवं भारतं शोभनीयं
सदास्माभिरेतत्तथा पूजनीयम्।
भवेद् देशभक्तिः समेषां जनानां
परादर्शरूपा सदावर्जनीया॥

## अन्वयाः

1. देवाः गीतकानि गायन्ति– ते पुरुषाः धन्याः किल (सन्ति ये) स्वर्गापवर्गास्पदमार्गभूते भारतभूमिभागे सुरत्वात् भूयः भवन्ति।
2. (देवाः गायन्तः कथयन्ति) अहो ! अमीषाम् (एभिः) किं शोभनम् अकारि ? (यत्) नृषु यैः भारताजिरे मुकुन्दसेवौपयिकं जन्म लब्धम्। स्विदुत एषां स्वयं हरिः प्रसन्नः। हि नः (अपि) स्पृहा।
3. एतत् प्रसिद्धं भारतं वर्षम्, इयं सदा निर्मला वत्सला मातृभूमिः इह धर्मजातिप्रभेदैः विभिन्नाः जनाः एकत्वभावं वहन्तः वसन्ति।
4. अस्मदीया भारतीया धरा विशाला, रम्यरूपा, शुभा भव्यभूतिः (च) एषा सागरैः, पर्वतैः, निर्झरैः वहन्तीभिः आपगाभिः च सदा सेविता (अस्ति)।
5. तथा शोभनीयं जगद्गौरवम् (च) एतत् भारतम् अस्माभिः सदा पूजनीयम्। (अत्रत्यानाम्) समेषां जनानां सदा आवर्जनीया परादर्शरूपा देशभक्तिः भवेत्।

## पदच्छेदाः

| | | |
|---|---|---|
| धन्यास्तु | – | धन्याः + तु |
| किमकारि | – | किम् + अकारि |
| स्विदुत | – | स्वित् + उत |
| यैर्जन्म | – | यैः + जन्म |

ABSOL ABSIEL SOLUTIONS PATNA

| | | |
|---|---|---|
| भारताजिरे | - | भारत + अजिरे |
| मुकुन्दसेवौपयिकम् | - | मुकुन्दसेवा + औपयिकम् |
| धर्म-जाति-प्रभेदैरिहैकत्वभावम् | - | धर्म-जाति-प्रभेदैः + इह + एकत्वभावम् |
| विशालास्मदीया | - | विशाला + अस्मदीया |
| पर्वतैर्निर्झरैर्भव्यभूतिर्वहन्तीभिरेषा | - | पर्वतैः + निर्झरैः + भव्यभूतिः + वहन्तीभिः + एषा |
| चापगाभिः | - | च + आपगाभिः |
| जगद्गौरवम् | - | जगत् + गौरवम् |
| सदास्माभिरेतत्तथा | - | सदा + अस्माभिः + एतत् + तथा |
| परादर्शरूपा | - | परा + आदर्शरूपा |
| सदावर्जनीया | - | सदा + आवर्जनीया |
| स्वर्गापवर्गास्पदमार्गभूते | - | स्वर्ग + अपवर्ग + आस्पदमार्गभूते |

## पदार्थाः

| | | | | |
|---|---|---|---|---|
| अकारि | - | अक्रियत | - | किया गया (कृ + लुङ् लकार, प्र० पु० एकवचन कर्मवाच्य) |
| किल | - | नूनम् | - | निश्चयवाचक अव्यय |
| सुरत्वात् | - | देवत्वात् | - | देवत्व के रूप में |
| स्वर्गापवर्गास्पदमार्गभूते | - | स्वर्ग-मोक्ष-योग्यमार्गरूपे | - | स्वर्ग और मोक्ष प्रदान करने योग्य-साधनस्वरूप। |
| भारताजिरे | - | भारतप्रांगणे | - | भारतभूमि में |
| स्विदुत | - | आहोस्वित् | - | अथवा |
| मुकुन्दसेवौपयिकम् | - | विष्णुसेवायोग्यम् | - | श्रीहरि की सेवा के योग्य |
| स्पृहा | - | वाञ्छा | - | इच्छा |
| वत्सला | - | वात्सल्ययुक्ता | - | ममतामयी |
| धर्म-जाति-प्रभैदैः | - | धर्मगत-जातिगत भेदोपभेदैः | - | धर्म और जाति के भेदों से |
| एकत्वभावम् | - | एकात्मभावम् | - | एकता के भाव को |
| वहन्तः | - | धारयन्तः | - | धारण करते हुए |
| अस्मदीया | - | अस्माकम् | - | हमारी |
| भव्यभूतिः | - | दिव्यैश्वर्या | - | भव्य ऐश्वर्य वाली |

| | | |
|---|---|---|
| आपगाभिः | - नदीभिः | - नदियों के द्वारा |
| समेषाम् | - सर्वेषाम् | - सभी की |
| परा | - श्रेष्ठा | - श्रेष्ठ |
| आवर्जनीया | - आकर्षणीया | - आकर्षण योग्य |
| आदर्शरूपा | - उदाहरणरूपा | - आदर्शरूप |
| गीतकानि | - गीतानि | - गीत |

## व्याकरणम्

गीतकानि - गीतम् एव गीतकम् तानि गीतकानि स्वार्थे कञ् प्रत्ययः।

स्वर्गापवर्गास्पदमार्गभूते - स्वर्गस्य अपवर्गस्य च मार्गभूतः (साधनस्वरूपः) सप्तमी एकवचने

अकारि - कृ धातोः कर्मवाच्ये प्रथमपुरुषे एकवचने लुङ्लकारे त प्रत्यये कृते 'अकारि' इति सिद्धम्।

भारताजिरे - भारतस्य अजिरे - षष्ठी तत्पुरुषः

मुकुन्दसेवौपयिकम् - मुकुन्दस्य सेवा इति मुकुन्दसेवा, तस्याः औपयिकम् उपायभूतम् इति मुकुन्दसेवौपयिकम् - षष्ठी तत्पुरुषः

वहन्तः - वह् + शतृ प्रत्यये वहत् पुँल्लिङ्गे प्रथमा बहुवचने वहन्तः।

सेविता - सेव् + क्त + टाप्

भव्यभूतिः - भव्या भूतिः यस्याः सा भव्यभूतिः

अस्मदीया - अस्मद् + छ (ईय) + टाप्

वहन्तीभिः - वह् + शतृ इति वहत् + ङीप् - वहन्ती तृतीय बहुवचनम्

शोभनीयम् - शुभ् + अनीयर्

पूजनीयम् - पूज् + अनीयर्

आवर्जनीया - आङ् + वृज् + अनीयर् + टाप्

देशभक्तिः - देशाय + भक्तिः - चतुर्थी तत्पुरुषः।

## अभ्यासः

### ( मौखिकः )

1. **एकपदेन उत्तरं वदत –**

(क) के गीतकानि गायन्ति ?

(ख) एषां कः प्रसन्नः ?

(ग) इयं निर्मला मातृभूमिः कीदृशी अस्ति ?

(घ) अस्मदीया भारतीया धरा कीदृशी अस्ति ?

(ङ) अस्माभिः सदा किं पूजनीयम् ?

2. **स्वमातृभूमिविषये द्वे वाक्ये वदत ।**

## अभ्यासः

### ( लिखितः )

ABDJEL SOLUTIONS ABSOL * PATNA *

1. **एकपदेन उत्तरं लिखत -**

(क) देवाः कानि गायन्ति ?

(ख) जनैः कीदृशं जन्म लब्धम् ?

(ग) विशाला धरा का ?

(घ) जगद् गौरवं किं वर्तते ?

(ङ) समेषां जनानां का भवेत् ?

2. **पूर्णवाक्येन उत्तरं लिखत -**

(क) अस्माकं भारतीया धरा कीदृशी अस्ति ?

(ख) भारतीया धरा कैः काभिः च सेविता ?

(ग) धर्म-जाति प्रभेदैः विभिन्नाः जनाः किं वहन्तः वसन्ति ?

(घ) के वारंवारं भारते जन्म गृह्णन्ति ?

(ङ) सर्वेषां जनानां देशभक्तिः कीदृशी भवेत् ?

(च) भारतभूमिः कीदृशी अस्ति ?

(छ) भारताजिरे जन्म लब्धुं स्पृहा केषाम् अस्ति ?

3. मञ्जूषायां लिखितपदानां समुचितप्रयोगं कृत्वा-

उदाहरणम्– अनुसृत्य पञ्च वाक्यानि रचयत -

रामेण, श्यामेन, लतया, सीतया, हिमांशुना, शिशुना, गीता, ग्रन्थः, कार्यम्, पत्रम्, रामायणम्, चित्रम्, लेखनीयम्, दर्शनीयम्, पठनीयम्, स्मरणीया, पठनीयः, करणीयम्।

उदाहरणम् - रामेण पत्रं लेखनीयम्।

(क) ..........................................................................................।

(ख) ..........................................................................................।

(ग) ..........................................................................................।

(घ) ..........................................................................................।

(ङ) ..........................................................................................।

4. उदाहरणम् अनुसृत्य निम्नाङ्कितपदानां कृते विलोमपदानि लिखत-

उदाहरणम् - ''धन्याः'' इतिपदस्य विलोमपदम् = अधन्याः

प्रश्नाः

| | | | |
|---|---|---|---|
| (क) | सुरः | (ख) | पूजनीयम् |
| (ग) | भारतीया | (घ) | शोभनम् |
| (ङ) | प्रसन्नः | (च) | प्रसिद्धम् |
| (छ) | शुभा | (ज) | लब्धम् |
| (झ) | गौरवम् | (ञ) | रम्यरूपा |

5. उदाहरणम् अनुसृत्य रेखाङ्कितानां स्थाने विलोमपदानां प्रयोगं कृत्वा वाक्यानि रचयत।

उदाहरणम् - ये <u>पुण्यं</u> कुर्वन्ति ते <u>धन्याः</u> भवन्ति।

उत्तरम् - ये पापं कुर्वन्ति ते अधन्याः भवन्ति।

(क) ये <u>सज्जनाः</u> सन्ति ते <u>शोभनं</u> कार्यं कुर्वन्ति।

(ख) <u>पुरा</u> गङ्गा <u>निर्मला</u> प्रवहति स्म।

(ग) वाटिका <u>सपुष्पवृक्षैः</u> <u>रम्या</u> प्रतिभाति।

(घ) <u>धर्मात्मा</u> अस्माभिः <u>पूजनीयः</u>।

(ङ) <u>सद्व्यवहारेण</u> मनसि <u>शान्तिः</u> प्रवर्धते।

ARIEL SOLUTIONS ABSOL PATNA

## योग्यताविस्तारः

अनेन पाठेन अयं सन्देशः प्रदीयते यत् वयं भारतीयाः स्वदेशं प्रति मनसा, वाचा, कर्मणा धनेन जीवनेन च निष्ठावन्तः भवेम। देशभक्तिः अस्माकं रक्तस्य कणे-कणे प्रवाहिता भवेत्। भारतमहिमा किं वा राष्ट्रमहिमा वेदेषु अपि वर्णितः। संस्कृतशिक्षकाणां सहयोगेन तान् वेदमन्त्रान् संगृह्णीयात् ।

(1) राष्ट्राभिवर्धनसूक्तम् (प्राचीनं राष्ट्रगीतम्) ॐ आ ब्रह्मन् ! ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायताम्, दोग्ध्री धेनुर्वोढाऽनड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठा सभेयो युवाऽस्य यजमानस्य वीरो जायताम्। निकामे-निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः, पच्यन्ताम् योगक्षेमो नः कल्पताम् ।

**''मन्त्रार्थाः सिद्धयः सन्तु पूर्णाः सन्तु मनोरथाः ।**

**शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥''**

(2) भारतमहिमा आधुनिकसंस्कृतसाहित्येऽपि भूरिशः प्राप्यते। तत्र स्व० वासुदेव द्विवेदिनः ''मातृभूमे नमो मातृभूमे नमः'' डा० रमाकान्त शुक्लस्य ''भाति मे भारतम्'' डा० सतीशचन्द्र झा वर्यस्य ''राजतां मे मनसि नः प्रियं भारतम्'' डा० वैद्यनाथ मिश्रस्य ''अखण्डं राष्ट्रदेवं स्वं नमामो भारतं दिव्यम्'' अन्येषाञ्च कवीनाम् मर्मस्पर्शिगीतानि भारतमहिमानं प्रस्तुवन्ति। एतेषां गीतानां वाचनं गायनञ्च करणीये।

(3) भारतस्य महिमानम् आधृत्य लघुनाटकस्य मञ्चनम् आयोजनीयम्।

(4) 'महिमा' महिमन् शब्दस्य प्रथमा विभक्तेः एकवचनस्य रूपं वर्तते। संस्कृते महिमन् पुँल्लिंगे भवति। एतस्य रूपाणि निम्नलिखितानि सन्ति।

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | महिमा | महिमानौ | महिमानः |
| द्वितीया | महिमानम् | महिमानौ | महिम्नः |
| तृतीया | महिम्ना | महिमभ्याम् | महिमभिः |
| चतुर्थी | महिम्ने | महिमभ्याम् | महिमभ्यः |

BSOL SOLUTIONS PATNA

| | | | |
|---|---|---|---|
| पञ्चमी | महिम्नः | महिमभ्याम् | महिमभ्यः |
| षष्ठी | महिम्नः | महिम्नोः | महिम्नाम् |
| सप्तमी | महिमनि, महिम्नि | महिम्नोः | महिमसु |
| सम्बोधन | हे महिमन् | हे महिमानौ | हे महिमानः |

एवमेव गरिमन् (गरिमा) लघिमन् (लघिमा) अणिमन् (अणिमा) प्रभृतिशब्दानां रूपाणि भवन्ति।

□

षष्ठः पाठः

# भारतीयसंस्काराः



**( भारतीयसंस्कृतेः अन्यतमं वैशिष्ट्यं विद्यते यत् जीवने इह समये समये संस्कारा अनुष्ठिता भवन्ति। अद्य संस्कारशब्दः सीमितो व्यङ्ग्यरूपः प्रयुज्यते किन्तु संस्कृतेरुपकरणमिदं भारतस्य व्यक्तित्वं रचयति। विदेशे निवसन्तो भारतीयाः संस्कारान् प्रति उन्मुखा जिज्ञासवश्च। पाठेऽस्मिन् तेषां संस्काराणां संक्षिप्तः परिचयो महत्वञ्च निरूपितम्। )**

भारतीयजीवने प्राचीनकालतः संस्काराः महत्त्वमधारयन्। प्राचीनसंस्कृतेरभिज्ञानं संस्कारेभ्यो जायते। अत्र ऋषीणां कल्पनासीत् यत् जीवनस्य सर्वेषु मुख्यावसरेषु वेदमन्त्राणां पाठः, वरिष्ठाणाम् आशीर्वादः, होमः, परिवारसदस्यानां सम्मेलनं च भवेत्। तत् सर्वं संस्काराणामनुष्ठाने संभवति। एवं संस्काराः महत्त्वं धारयन्ति। किञ्च संस्कारस्य मौलिकः अर्थः परिमार्जनरूपः गुणाधानरूपश्च न विस्मर्यते। अतः संस्काराः मानवस्य क्रमशः परिमार्जने दोषापनयने गुणाधाने च योगदानं कुर्वन्ति।

संस्काराः प्रायेण पञ्चविधाः सन्ति–जन्मपूर्वास्त्रयः, शैशवाः षट्, शैक्षणिकाः पञ्च, गृहस्थसंस्कारः विवाहरूपः एकः, मरणोत्तरसंस्कारश्चैकः। एवं षोडश संस्काराः भवन्ति। जन्मपूर्वसंस्कारेषु गर्भाधानं

पुंसवनं सीमन्तोनयनं चेति त्रयो भवन्ति। अत्र गर्भरक्षा, गर्भस्थस्य संस्कारारोपणम्, गर्भवत्याश्च प्रसन्नता चेति प्रयोजनं कल्पितमस्ति। शैशवसंस्कारेषु जातकर्म, नामकरणम्, निष्क्रमणम्, अन्नप्राशनम्, चूडाकर्म, कर्णवेधश्चेति क्रमशो भवन्ति।

शिक्षासंस्कारेषु अक्षरारम्भः, उपनयनम्, वेदारम्भः, केशान्तः समावर्त्तनञ्चेति संस्काराः प्रकल्पिताः। अक्षरारम्भे अक्षरलेखनम् अङ्कलेखनं च शिशुः प्रारभते। उपनयनसंस्कारस्य अर्थः गुरुणा शिष्यस्य स्व गृहे नयनं भवति। तत्र शिष्यः शिक्षानियमान् पालयन् अध्ययनं करोति। ते नियमाः ब्रह्मचर्यव्रते समाविष्टाः। प्राचीनकाले शिष्यः ब्रह्मचारी इति कथ्यते स्म। गुरुगृहे एव शिष्यः वेदारम्भं करोति स्म। वेदानां महत्त्वं प्राचीनशिक्षायाम् उत्कृष्टं मन्यते स्म। केशान्तसंस्कारे गुरुगृहे एव शिष्यस्य प्रथमं क्षौरकर्म भवति स्म। अत्र गोदानं मुख्यं कर्म। अतः साहित्यग्रन्थेषु अस्य नामान्तरं गोदानसंस्कारोऽपि लभ्यते। समावर्त्तनसंस्कारस्योद्देश्यं शिष्यस्य गुरुगृहात् गृहस्थजीवने प्रवेशः। शिक्षावसाने गुरुः शिष्यान् उपदिश्य गृहं प्रेषयति। उपदेशेषु प्रायेण जीवनस्य धर्माः प्रतिपाद्यन्ते। यथा- सत्यं वद, धर्मं चर, स्वाध्यायान्मा प्रमदः इत्यादि।

विवाहसंस्कारपूर्वकमेव मनुष्यः वस्तुतो गृहस्थजीवनं प्रविशति। विवाहः पवित्रसंस्कारः मतः यत्र नानाविधानि कर्मकाण्डानि भवन्ति। तेषु वाग्दानम्, मण्डपनिर्माणम्, वधूगृहे वरपक्षस्य स्वागतम्, वरवध्वोः परस्परं निरीक्षणम्, कन्यादानम्, अग्निस्थापनम्, पाणिग्रहणम्, लाजाहोमः, सप्तपदी, सिन्दूरदानम् इत्यादि। सर्वत्र समानरूपेण विवाहसंस्कारस्य प्रायेण आयोजनं भवति। तदनन्तरं गर्भाधानादयः संस्काराः पुनरावर्तन्ते जीवनचक्रं च भ्रमति। मरणादनन्तरम् अन्त्येष्टिसंस्कारः अनुष्ठीयते। एवं भारतीयजीवनदर्शनस्य महत्त्वपूर्णमुपादानं संस्कारः इति।

## पदच्छेदाः

| | | |
|---|---|---|
| महत्वमधारयन् | - | महत्त्वम् + अधारयन् |
| प्राचीनसंस्कृतेरभिज्ञानम् | - | प्राचीनसंस्कृतेः + अभिज्ञानम् |
| कल्पनासीत् | - | कल्पना + आसीत् |
| मुख्यावसरेषु | - | मुख्य + अवसरेषु |
| संस्काराणामनुष्ठाने | - | संस्काराणाम् + अनुष्ठाने |
| गुणाधानरूपश्च | - | गुण + आधानरूपः + च |

| | | |
|---|---|---|
| दोषापनयने | – | दोष + अपनयने |
| जन्मपूर्वास्त्रयः | – | जन्मपूर्वाः + त्रयः |
| मरणोत्तरसंस्कारश्चैक | – | मरण + उत्तर + संस्कारः + च + एकः |
| सीमन्तोन्नयनम् | – | सीमन्त + उत् + नयनम् |
| संस्कारारोपणम् | – | सम् + कार + आरोपणम् |
| गर्भवत्याश्च | – | गर्भवत्याः + च |
| निष्क्रमणम् | – | निः + क्रमणम् |
| कर्णवेधश्चेति | – | कर्णवेधः + च + इति |
| अक्षरारम्भः | – | अक्षर + आरम्भः |
| वेदारम्भः | – | वेद + आरम्भः |
| केशान्तः | – | केश + अन्तः |
| गोदानसंस्कारोऽपि | – | गोदानसंस्कारः + अपि |
| निरीक्षणम् | – | निः + ईक्षणम् |
| तदनन्तरम् | – | तत् + अनन्तरम् |
| पुनरावर्त्तन्ते | – | पुनः + आवर्त्तन्ते |
| मरणादनन्तरम् | – | मरणात् + अनन्तरम् |
| अन्त्येष्टि | – | अन्त्य + इष्टि |

## पदार्थाः

| | | | | |
|---|---|---|---|---|
| गुणाधानरूपाः संस्काराः | – | परिष्काराः | – | संस्कार, परिष्कार, गुणों का आधान |
| अभिज्ञानम् | – | परिचयः | – | पहचान |
| कल्पना | – | अभिधारणा | – | अवधारणा, सोच |
| दोषापनयने | – | दोषनिवारणे | – | दोषों को दूर करने में |
| गुणाधाने | – | गुणानाम् अङ्गीकारे | – | गुणों के ग्रहण में |

| | | |
|---|---|---|
| निष्क्रमणम् | - बहिर्गमनम् | - बाहर निकलना |
| अन्नप्राशनम् | - अन्नस्वीकरणम् | - अन्न का भोजन |
| उपनयनम् | - गुरोः सान्निध्यप्रापणम् | - गुरु के पास ले जाने वाला संस्कार (पुरा गुरुः शिष्यं स्वाश्रमं प्रति नयति स्म अतः संस्कारस्य नाम उपनयनम् अस्ति)। |
| क्षौरकर्म | - केशस्य कर्तनम् | - केशों को काटनेवाला कर्म |
| सप्तपदी | - विवाहसंस्कारे पत्या सह पत्न्याः सप्तवारं चक्रविशेषे पदनिधानम् | - विवाह संस्कार में पति के साथ पत्नी का सात बार अल्पना-विशेष में पैर देना। |
| लाजाहोमः | - धान्यस्य लाजया विधीयमानं हवनम् | - धान के लावे से किया जाने वाला हवन। |
| अन्त्येष्टिसंस्कारः | - मृतशरीरस्य अग्नौ ज्वालनम् | - शव को अग्नि में जलाना। (कुछ विशेष परिस्थितियों में शव को भूमि में गाड़ा भी जाता है) |
| उपादानम् | - स्रोतःस्वरूपम्, मुख्यकारणम् | - स्रोत स्वरूप |

## व्याकरणम्

| | |
|---|---|
| संस्कारः | - सम् + कृ + घञ् |
| संस्कृतेः | - सम् + कृ + क्तिन् ष.वि. ए.व. |
| अभिज्ञानम् | - अभि + ज्ञा + ल्युट् |
| सम्मेलनम् | - सम् + मिल् + ल्युट् |
| निष्क्रमणम् | - निस् + क्रम् + ल्युट् |
| उन्नयनम् | - उत् + नी + ल्युट् |
| आधानम् | - आङ् + धा + ल्युट् |

| | | |
|---|---|---|
| उपनयनम् | – | उप + नी + ल्युट् |
| आरोपणम् | – | आङ् + रुह् + णिच् + ल्युट् |
| निरीक्षणम् | – | निर् + ईक्ष् + ल्युट् |
| अध्ययनम् | – | अधि + इङ् + ल्युट् |
| लेखनम् | – | लिख् + ल्युट् |
| पालयन् | – | पाल् + णिच् + शतृ |
| प्रसन्नता | – | प्रसन्न + तल् + टाप् |
| महत्त्वम् | – | महत् + त्वम् |
| समाविष्टाः | – | सम् + आङ् + विश् + क्त |
| स्थापनम् | – | स्था + णिच् + ल्युट् |
| ग्रहणम् | – | ग्रह् + ल्युट् |
| दानम् | – | दा + ल्युट् |
| प्रवेशः | – | प्र + विश् + घञ् |
| निर्माणम् | – | निर् + मा + ल्युट् |
| आयोजनम् | – | आङ् + युज् + णिच् + ल्युट् |
| उपदिश्य | – | उप + दिश् + ल्यप् |
| उत्कृष्टम् | – | उत् + कृष् + क्त |
| संक्षिप्तः | – | सम् + क्षिप् + क्त |
| निवसन्तः | – | नि + वस् + शतृ प्र.वि. ब.व. |
| मौलिकः | – | मूल + ठक् |
| शैक्षणिकाः | – | शिक्षण + ठक् प्र.वि. ब.व. |
| पाठः | – | पठ् + घञ् |
| अनुष्ठाने | – | अनु + स्था + ल्युट् स.वि. ए.व. |

## अभ्यासः

### ( मौखिकः )

1. **एकपदेन वदत -**

(क) संस्काराः कति सन्ति ?

(ख) जन्मतः पूर्वं कति संस्काराः भवन्ति ?

(ग) शैशवे कति संस्काराः भवन्ति ?

(घ) अक्षरारम्भः कीदृशः संस्कारः ?

(ङ) गृहस्थजीवनस्य एकः संस्कारः कः ?

## अभ्यासः

### ( लिखितः )

1. **एकपदेन उत्तराणि लिखत -**

(क) भारतीयसंस्कृतेः परिचयः केभ्यः जायते ?

(ख) शैक्षणिकाः संस्काराः कति सन्ति ?

(ग) 'सप्तपदी' क्रिया कस्मिन् संस्कारे विधीयते ?

(घ) भारतीयदर्शनस्य महत्त्वपूर्णम् उपादानं किम् ?

(ङ) सीमन्तोन्नयनं केषु संस्कारेषु गण्यते ?

(च) अन्नप्राशनम् केषु संस्कारेषु गण्यते ?

(छ) गुरुगृहे शिष्यः कान् पालयन् अध्ययनं करोति ?

ABDIEL SOLUTIONS ABSOL PATNA

2. **पूर्णवाक्येन उत्तराणि लिखत -**

(क) संस्काराः मानवस्य कुत्र-कुत्र योगदानं कुर्वन्ति ?

(ख) शैक्षणिकसंस्कारेषु के के संस्काराः प्रकल्पिताः ?

(ग) शैशवसंस्कारेषु के के संस्काराः सम्पद्यन्ते ?

(घ) विवाहसंस्कारे कानि मुख्यानि कार्याणि भवन्ति ?

(ङ) अन्त्येष्टिसंस्कारः कदा सम्पाद्यते ?

(च) पुंसवनसंस्कारः कदा क्रियते ?

(छ) पुरा शिष्यः वेदारम्भं कुत्र करोति स्म ?

3. **अधोलिखितम् उदाहरणं ध्यानेन पठत । ततः प्रदत्तपदैः ............ कृत्वा ............ करोति / कुर्वन्ति प्रयोगपूर्वकं च एकैकं वाक्यं रचयत।**

उदाहरणम्- (क) बालकः स्नानं कृत्वा अध्ययनं करोति।

(ख) जनाः भोजनं कृत्वा शयनं कुर्वन्ति।

**प्रश्नाः -**

(क) अग्निस्थापनम्

(ख) अक्षरलेखनम्

(ग) पाणिग्रहणम्

(घ) निरीक्षणम्

(ङ) गोदानम्

(च) उपनयनम्

(छ) वाग्दानम्

4. **अधोलिखित-स्तम्भद्वये प्रदत्तपदानां समुचितविलोमपदैः सह मेलनं कृत्वा लिखत।**

| स्तम्भः (क) | स्तम्भः (ख) |
|---|---|
| (अ) प्रयोजनम् | (क) अप्रसन्नता |
| (आ) प्रसन्नता | (ख) निष्प्रयोजनम् |
| (इ) संस्काराः | (ग) आनयनम् |
| (ई) अपनयनम् | (घ) विस्मर्यते |
| (उ) स्मर्यते | (ङ) कुसंस्काराः |
| (ऊ) वरिष्ठानाम् | (च) गुणापनयनम् |
| (ऋ) गुणाधानम् | (छ) कनिष्ठानाम् |

5. **निम्नाङ्कितप्रकृतिप्रत्ययानां योगं कृत्वा पदानि प्रदर्शयत।**

(क) परि + मृज् + णिच् + ल्युट्

(ख) शिशु + अण्

(ग) प्र + अश् + ल्युट्

(घ) लिख् + ल्युट्

(ङ) क्रम + शतृ

## योग्यताविस्तारः

प्रस्तुतपाठः वर्तमानसन्दर्भे स्वकीयं भारतीयमूल्यं प्रति जागरणम् उत्पादयति। सम्प्रति यथा-यथा भौतिकविकासः जायमानः अस्ति तथा तथा आध्यात्मिकह्रासः परिलक्षितः भवति। अस्यां स्थितौ भारतीयसंस्काराः सार्वकालिकं जीवनमूल्यं संवर्द्धयितुं समर्थाः सन्ति। अतः संस्कृतशिक्षकस्य, अनुसन्धानेन सम्बद्धानां पत्र-पत्रिकाणां च सहयोगेन संस्काराणां वैज्ञानिकत्वं ज्ञातव्यम्। यतो हि अस्माकं संस्काराणाम् एकैकः पक्षः स्वास्थ्यविज्ञानस्य पारिस्थितिकतन्त्रस्य, समरससामाजिकजीवनदर्शनस्य च दृष्टिकोणैः सम्पुष्टः सूक्ष्मश्च अस्ति। अतः एतेषां निरादरः निन्दनीयः अस्ति। मौलाना एकवालः भारतीयसंस्कारान् एव उद्दिश्य सगर्वम् उक्तवान् आसीत् -

यूनान मिस्र रोमा सब मिट गये जहाँ से

कुछ बात है कि हस्ती मिटती नहीं हमारी।

ABDIEL SOLUTIONS ABSOL PATNA

### संस्कारवर्द्धककार्याणि -

1. प्रातः जागरणम् - प्रातः उत्थाय (सूर्योदयात् पूर्वमेव) करौ संयोज्य करतलं विलोकयन् संकल्पपूर्वकं पठेत् :-

करा‍ग्रे वसते लक्ष्मीः करमध्ये सरस्वती।

करमूले भवेद् गौरी, प्रभाते करदर्शनम्॥

इति पठित्वा करतलं परस्परं संस्पृश्य नेत्रे स्पृशेत्। ततः भूमिं स्पृष्ट्वा पठेत् -

समुद्रवसने देवि पर्वतस्तनमण्डिते।

विष्णुपत्नि ! नमस्तुभ्यं पादस्पर्शं क्षमस्व मे॥

ततः मातापितरौ परिवारस्य ज्येष्ठान् श्रेष्ठान् गुरुजनान् च प्रणमेत्। यतो हि अस्माकं

वैज्ञानिकी संस्कृतिः उपदेशं करोति-

मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव।

2. गायत्रीसन्ध्योपासनम् – इदं वेदप्रमाणितं तथ्यं वर्तते, यस्य आधुनिकवैज्ञानिका अपि समर्थनं कुर्वन्ति यत् गायत्रीजपेन सन्ध्योपासनया च आयुः, विद्या, यशः, कान्तिः, शान्ति, तेजः, अमरत्वं च प्राप्यन्ते। अतः स्वदैनिककार्यक्रमे गायत्रीजपस्य संध्योपासनस्य च कृते एकः निश्चितसमयः सुरक्षितः करणीयः। व्यक्तित्वसंवर्द्धनाय अयमेकः अमोघः (अचूक) उपायः अस्ति। प्राणायामसाधना अपि संध्योपासनस्यैव अंगभूता अस्ति। संस्कृतशिक्षकस्य योगशिक्षकस्य च सहयोगेन अभिभावकानां च परामर्शैः अस्मिन् सम्बन्धे कार्यं करणीयम्।

3. संस्काराणां महत्त्वप्रतिपादकानि बहूनि गीतानि लोकपरम्परायां प्रसिद्धानि सन्ति। तत्र उपनयनसंस्कारे केशकर्तनकाले गीयमानं संस्कारगीतम् -

नापित ! शनैः शनैः बटोः केशं मुण्डय-2

केशं मुण्डय रे नापित केशं मुण्डय। नापित ! शनैः ....

यदि त्वं बटोः केशं मुण्डयिष्यसि - 2

बटोः माता भूरि द्रव्यं दास्यति ॥ नापित।

सप्तमः पाठः

# नीतिश्लोकाः

( अयं पाठः सुप्रसिद्धस्य ग्रन्थस्य महाभारतस्य उद्योगपर्वणः अंशविशेष ( अध्यायाः 33-40) रूपायाः विदुरनीतेः संकलितः। युद्धम् आसन्नं प्राप्य धृतराष्ट्रो मन्त्रिप्रवरं विदुरं स्वचित्तस्य शान्तये कांश्चित् प्रश्नान् नीतिविषयकान् पृच्छति । तेषां समुचितमुत्तरं विदुरो ददाति। तदेव प्रश्नोत्तररूपं ग्रन्थरत्नं विदुरनीतिः। इयमपि भगवद्गीतेव महाभारतस्याङ्गमपि स्वतन्त्रग्रन्थरूपा वर्तते।)

यस्य कृत्यं न विघ्नन्ति शीतमुष्णं भयं रतिः ।<br>
समृद्धिरसमृद्धिर्वा स वै पण्डित उच्यते ॥1॥

तत्त्वज्ञः सर्वभूतानां योगज्ञः सर्वकर्मणाम् ।<br>
उपायज्ञो मनुष्याणां नरः पण्डित उच्यते ॥2॥

अनाहूतः प्रविशति अपृष्टो बहु भाषते ।<br>
अविश्वस्ते विश्वसिति मूढचेता नराधमः ॥3॥

एको धर्मः परं श्रेयः क्षमैका शान्तिरुत्तमा ।<br>
विद्यैका परमा तृप्तिः अहिंसैका सुखावहा ॥4॥

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।<br>
कामः क्रोधस्तथा लोभस्तस्मादेतत् त्रयं त्यजेत् ॥5॥

षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।<br>
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥6॥

सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते ।<br>
मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते ॥7॥

सुलभाः पुरुषा राजन् सततं प्रियवादिनः ।
अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः ॥8॥

पूजनीया महाभागाः पुण्याश्च गृहदीप्तयः ।
स्त्रियः श्रियो गृहस्योक्तास्तस्माद्रक्ष्या विशेषतः ॥9॥

अकीर्तिं विनयो हन्ति हन्त्यनर्थं पराक्रमः ।
हन्ति नित्यं क्षमा क्रोधमाचारो हन्त्यलक्षणम् ॥10॥

## अन्वयाः

यस्य कृत्यं शीतम्, उष्णं, भयं, रतिः, समृद्धि, असमृद्धिः वा (च) न विघ्नन्ति सः वै पण्डित उच्यते ॥1॥

सर्वभूतानां तत्त्वज्ञः सर्वकर्मणां योगज्ञः मनुष्याणाम् (च) उपायज्ञः नरः पण्डितः उच्यते ॥2॥

मूढचेता नराधमः अनाहूतः प्रविशति, अपृष्टः (अपि) बहु भाषते, अविश्वस्ते (च) विश्वसिति ॥3॥

एकः (एव) धर्मः परं श्रेयः, एका (एव) क्षमा उत्तमा शान्तिः, एका विद्या परमा तृप्तिः, एका अहिंसा (च) (परमा) सुखावहा (भवति) ॥4॥

नरकस्य इदम् त्रिविधं द्वारं कामः, क्रोधः तथा लोभः (चेति)। तस्मात् आत्मनः नाशनम् एतत् त्रयं त्यजेत् ॥5॥

भूतिम् इच्छता पुरुषेण इह निद्रा, तन्द्रा, भयं, क्रोधः, आलस्यं, दीर्घसूत्रता (च) षड् दोषाः हातव्याः ॥6॥

धर्मः सत्येन रक्ष्यते, विद्या योगेन रक्ष्यते, रूपं मृजया रक्ष्यते, कुलं (च) वृत्तेन रक्ष्यते ॥7॥

हे राजन् ! सततं प्रियवादिनः पुरुषाः सुलभाः (सन्ति) तु अप्रियस्य पथ्यस्य वक्ता श्रोता च दुर्लभः (अस्ति) ॥8॥

गृहस्य श्रियः, गृहदीप्तयः पुण्याः महाभागाश्च स्त्रियः पूजनीयाः उक्ताः (सन्ति)। तस्मात् (एताः) विशेषतः रक्ष्याः (भवन्ति) ॥9॥

विनयः अकीर्तिं हन्ति, पराक्रमः अनर्थं हन्ति, क्षमा नित्यं क्रोधं हन्ति, आचारः (च) अलक्षणं हन्ति ॥10॥

## शब्दार्थाः

| | | |
|---|---|---|
| रतिः | आनन्दः | भावुकता |
| तत्वज्ञः | रहस्यज्ञः | रहस्य को जाननेवाला |
| योगज्ञः | कौशलं जानाति | कौशल जाननेवाला |
| उच्यते | कथ्यते | कहा जाता है |
| उपायज्ञो | उपायं जानाति | उपाय को जाननेवाला |
| अनाहूतः | न आहूतः | बिना बुलाये हुए |
| अपृष्टः | न पृष्टः | बिना पूछे हुए |
| अविश्वस्ते | अविश्वासयोग्ये जने | अविश्वसनीय व्यक्ति पर |
| मूढचेता | मूर्खः | मूर्ख हृदय वाला |
| नराधमः | निकृष्टः जनः | मनुष्यों में नीच |
| सुखावहा | सुखदा | सुख देनेवाली |
| भूतिम् | ऐश्वर्यम् | ऐश्वर्य को |
| इच्छता | वाञ्छता | चाहते हुए |
| मृजया | शुद्ध्या ( शृङ्गारोपचारेण) | स्वच्छता या उबटन आदि के द्वारा |
| प्रियवादिनः | मधुरभाषिणः | प्रिय बोलने वाले |
| अकीर्तिम् | अपयशः | अपयश |
| हन्ति | नाशयति | नाश करता है |
| अलक्षणम् | कुलक्षणम् | कुलक्षण, कुरूपता |

## व्याकरणम्

### सन्धिविच्छेदः-

समृद्धिरसमृद्धिर्वा - समृद्धिः + असमृद्धिः + वा

विद्यैका - विद्या + एका

अहिंसैका - अहिंसा + एका

नरकस्येदं - नरकस्य + इदम्

नाशनमात्मनः - नाशनम् + आत्मनः

गृहस्योक्तास्तस्माद्रक्ष्या - गृहस्य + उक्ताः + तस्मात् + रक्ष्याः

क्रोधमाचारः - क्रोधम् + आचारः

हन्त्यलक्षणम् - हन्ति + अलक्षणम्

**प्रकृतिप्रत्ययविभागः**

निवर्त्य - नि + वृत् + ल्यप्

उपगम्य - उप + गम् + ल्यप्

वक्तव्यम् - वच् + तव्यत्

परिहृत्य - परि + हृ + ल्यप्

साध्यः - साध् + ण्यत्

गृहीत्वा - ग्रह् + क्त्वा

जित्वा - जि + क्त्वा

भेतव्यम् - भी + तव्यत्

भेद्यम् - भिद् + ण्यत्

दातव्यम् - दा + तव्यत्

जनितम् - जन् + क्त

आचारः - आङ् + चर् + घञ्

लोभः - लुभ् + घञ्

## अभ्यासः

### (मौखिकः)

1. **एकपदेन उत्तरं वदत -**

(क) विदुरः कः आसीत् ?

(ख) मूढचेता नराधमः कस्मिन् विश्वसिति ?

(ग) उत्तमा शान्तिः का ?

(घ) का परमा तृप्तिः ?

(ङ) नरकस्य कियद् द्वारं परिगणितम् ?

(च) विद्या केन रक्ष्यते ?

(छ) विनयः कं हन्ति ?

**2. श्लोकांशं योजयित्वा वदत-**

(क) त्रिविधं नरकस्येदं द्वारं ......................... ।

कामक्रोधस्तया ......................... त्रयं त्यजेत्।

(ख) सत्येन रक्ष्यते धर्मो .........................।

......................... कुलं वृत्तेन रक्ष्यते।।

## अभ्यासः

## (लिखितः)

**1. एकपदेन उत्तरं वदत -**

(क) केषां तत्वज्ञः पण्डितः उच्यते ?

(ख) अनाहूतः कः प्रविशति ?

(ग) धर्मः केन रक्ष्यते ?

(घ) क्षमा कं हन्ति ?

(ङ) सुखावहा का ?

(च) नरकस्य त्रिविधं द्वारं कस्य नाशनम् ?

(छ) केन षड् दोषाः हातव्याः ?

**2. उदाहरणमनुसृत्य क्तिन् प्रत्यय-योगेन शब्द निर्माणं करणीयम् –**

उदाहरणम् – भू + क्तिन् = भूतिः

**प्रश्नाः-**

(क) गम् + क्तिन्

शम् + क्तिन्

तृप् + क्तिन्

रम् + क्तिन्

श्रम् + क्तिन्

सम् + ऋध् + क्तिन्

वृध् + क्तिन्

नी + क्तिन्

हन् + क्तिन्

कृ + क्तिन्

3. **उदाहरणानुसारं वाच्य-परिवर्तनं कुरुत –**

उदाहरणम् - (क) कर्तृवाच्ये - विनय: अकीर्तिं हन्ति।

कर्मवाच्ये - विनयेन अकीर्ति: हन्यते।

(ख) कर्मवाच्ये - धर्म: सत्येन रक्ष्यते।

कर्तृवाच्ये - सत्यं धर्मं रक्षति।

**प्रश्ना:**

(क) पराक्रम: अनर्थं हन्ति।

(ख) क्षमया क्रोध: हन्यते।

(ग) योग: विद्यां रक्षति।

(घ) मृजया रूपं रक्ष्यते।

(ङ) आचारेण अलक्षण: हन्यते।

(च) मया ग्रन्थ: पठ्यते।

(छ) वयं वेदं पठाम:।

4. **पूर्णवाक्येन उत्तरं लिखत –**

(क) पुरुषेण के षड् दोषा: हातव्या: ?

(ख) पण्डित: क: उच्यते ?

(ग) एक एव धर्म: किं कथ्यते ?

(घ) नरकस्य कानि त्रीणि द्वाराणि सन्ति ?

(ङ) कस्य कस्य च वक्ता श्रोता च दुर्लभ: ?

(च) स्त्रिय: गृहस्य का: उक्ता: सन्ति ?

(छ) कुलं केन रक्ष्यते ?

ABI ABSOL SOLUTIONS * PATNA *
ABDIEL SOLUTIONS ABSOL * PATNA *

5. **निम्नाङ्कितपदैः एकैकं वाक्यं रचयत -**

(क) उच्यते, (ख) त्यजेत्, (ग) बहुभाषते, (घ) विश्वसिति, (ङ) वर्तते, (च) विघ्नन्ति, (छ) रक्ष्या।

## योग्यताविस्तारः

धृतराष्ट्रेण सह विदुरस्य सम्पन्नः संवादः ''विदुरनीतिः'' इति कथ्यते। अनुभवसिद्धस्य विदुरस्य एकैकं पदं नीतिसम्मतं, व्यावहारिकम् अनुकरणीयञ्चास्ति। यदा धृतराष्ट्रः विदुरम्पृच्छति हे विदुर ! अस्मिन् संसारे सुखानि कानि सन्ति ? विदुरः उक्तवान् -

अर्थागमोऽनित्यमरोगिता च,
प्रिया च भार्या प्रियवादिनी च।
वश्यश्च पुत्रोऽर्थकरी च विद्या
षड् जीवलोकस्य सुखानि राजन्।।

## अनुशीलनी क्रिया

(क) विदुरनीतौ व्यक्तित्वनिर्माणाय अमोघमन्त्राः दृश्यन्ते। तेषां मन्त्राणाम् अनुशीलनं करणीयम्। यथा स्व-दैनन्दिनी मध्ये आलस्यवशात् निद्रावशात्, भयवशात्, क्रोधवशात् दीर्घसूत्रतावशाच्च जायमानाः कुपरिणामाः लेखनीयाः। तदनन्तरम् आलस्यविनाशाय स्फूर्तिमन्त्रस्य, निद्रा तन्द्रा निवारणाय जागरूकतायाः, भयशमनाय साहसस्य, क्रोधविनाशाय शान्तिमन्त्रस्य च साहाय्यं स्वीकरणीयम् ।

(ख) संस्कृतशिक्षकस्य सहयोगेन नीतिप्रदानां श्लोकानाम् संग्रहः कर्त्तव्यः। यथा -

(क) विक्लवा वीर्यहीनाश्च ते दैवं पर्युपासते।
वीराः सम्भावितात्मानो न दैवं समुपासते।। (वाल्मीकिः)

(ख) विद्या विवादाय धनं मदाय
शक्तिः परेषां परिपीडनाय।
खलस्य साधोर्विपरीतमेतत्
ज्ञानाय दानाय च रक्षणाय।।

□

अष्टमः पाठः

# कर्मवीर कथा

**(पाठेऽस्मिन् समाजे दलितस्य ग्रामवासिनः पुरुषस्य कथा वर्तते। कर्मवीरः असौ निजोत्साहेन विद्यां प्राप्य महत्पदं लभते, समाजे च सर्वत्र सत्कृतो भवति। कथाया मूल्यं वर्तते यत् निराशो न स्यात्, उत्साहेन सर्वं कर्तुं प्रभवेत्।)**

अस्ति बिहारराज्यस्य दुर्गमप्राये प्रान्तरे 'भीखनटोला' नाम ग्रामः। निवसन्ति स्म तत्रातिनिर्धनाः शिक्षाविहीनाः क्लिष्टजीवनाः जनाः। तेष्वेवान्यतमस्य जनस्य परिवारो ग्रामाद् बहिःस्थितायां कुट्यां न्यवसत्। कुटी तु जीर्णप्रायत्वात् परिवारजनान् आतपमात्राद् रक्षति, न वृष्टेः। परिवारे स्वयं गृहस्वामी, तस्य भार्या तयोरेकः पुत्रः कनीयसी दुहिता चेत्यासन्।

तस्माद् ग्रामात् क्रोशमात्रदूरं प्राथमिको विद्यालयः प्रशासनेन संस्थापितः। तत्रैको नवीनदृष्टिसम्पन्नः सामाजिकसामरस्यरसिकः शिक्षकः समागतः। भीखनटोलां द्रष्टुमागतः स कदाचित् खेलनरतं दलितबालकं विलोक्य तस्यापातरमणीयेन स्वभावेनाभिभूतः। शिक्षकं बालकमेनं स्वविद्यालयमानीय स्वयं शिक्षितुमारभत। बालकोऽपि तस्य शिक्षणशैल्याकृष्टः शिक्षाकर्म जीवनस्य परमा गतिरिति मन्यमानो निरन्तरमध्यवसायेन विद्याधिगमाय निरतोऽभवत्। क्रमशः उच्चविद्यालयं गतस्तस्यैव शिक्षकस्याध्यापनेन स्वाध्यवसायेन च प्राथम्यं प्राप। 'छात्राणामध्ययनं तपः' इति भूयोभूयः स्वविद्यागुरुणोपदिष्टोऽसौ बालकः पित्रोरर्थाभावेऽपि छात्रवृत्त्या कनीयश्छात्राणां शिक्षणलब्धेन धनेन च नगरगते महाविद्यालये प्रवेशमलभत।

तत्रापि गुरूणां प्रियः सन् सततं पुस्तकालये स्ववर्गे च सदावहितचेतसा अकृतकालक्षेपः स्वाध्यायनिरतोऽभूत्। महाविद्यालयस्य पुस्तकागारे बहूनां विषयाणां पुस्तकानि आत्मसादसौ कृतवान्। तत्र स्नातकपरीक्षायां विश्वविद्यालये प्रथमस्थानमवाप्य स्वमहाविद्यालयस्य ख्यातिमवर्धयत्। सर्वत्र रामप्रवेशराम इति शब्दः श्रूयते स्म नगरे विश्वविद्यालयपरिसरे च। नाजानतां पितरावस्य विद्याजन्यां प्रतिष्ठाम्।

वर्षान्तरेऽसौ केन्द्रीयलोकसेवापरीक्षायामपि स्वाध्यवसायेन व्यापकविषयज्ञानेन च उन्नतं स्थानमवाप। साक्षात्कारे च समितिसदस्यास्तस्य व्यापकेन ज्ञानेन, तत्रापि तादृशे परिवारपरिवेशे कृतेन श्रमेणाभ्यासेन च परं प्रीताः अभूवन्।

अद्य रामप्रवेशरामस्य प्रतिष्ठा स्वप्रान्ते केन्द्रप्रशासने च प्रभूता वर्तते। तस्य प्रशासनक्षमता संकटकाले च निर्णयस्य सामर्थ्यं सर्वेषामावर्जके वर्तेते। नूनमसौ कर्मवीरो व्यतीत्य बाधाः प्रशासनकेन्द्रे लोकप्रियः संजातः। सत्यमुक्तम् – उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः।

## पदच्छेदाः

| | | |
|---|---|---|
| पाठेऽस्मिन् | – | पाठे + अस्मिन् |
| निजोत्साहेन | – | निज + उत्साहेन |
| तत्रातिनिर्धनाः | – | तत्र + अतिनिर्धनाः |
| तेष्वेवान्यतमस्य | – | तेषु + एव + अन्यतमस्य |
| न्यवसत् | – | नि + अवसत् |
| तयोरेकः | – | तयोः + एकः |
| चेत्यासन् | – | च + इति + आसन् |
| तत्रैकः | – | तत्र + एकः |
| तस्यापातरमणीयेन | – | तस्य + आपातरमणीयेन |
| स्वभावेनाभिभूतः | – | स्वभावेन + अभिभूतः |
| बालकमेनम् | – | बालकम् + एनम् |
| शिक्षितुमारभत | – | शिक्षितुम् + आरभत |
| बालकोऽपि | – | बालकः + अपि |
| शिक्षणशैल्याकृष्टः | – | शिक्षणशैल्या + आकृष्टः |
| गतिरिति | – | गतिः + इति |
| विद्याधिगमाय | – | विद्या + अधिगमाय |
| गतस्तस्यैव | – | गतः + तस्य + एव |

ABDIEL SOLUTIONS ABSOL PATNA

| | | |
|---|---|---|
| निरतोऽभवत् | – | निरतः + अभवत् |
| शिक्षकस्याध्यापनेन | – | शिक्षकस्य + अध्यापनेन |
| स्वविद्यागुरुणोपदिष्टोऽसौ | – | स्वविद्यागुरुणा + उपदिष्टः + असौ |
| पित्रोरर्थाभावेऽपि | – | पित्रोः + अर्थ + अभावे + अपि |
| कनीयश्छात्राणाम् | – | कनीयस् + छात्राणाम् |
| पुस्तकालये | – | पुस्तक + आलये |
| सदावहितचेतसा | – | सदा + अवहितचेतसा |
| स्वाध्यायनिरतोऽभूत् | – | स्व + अध्यायनिरतः + अभूत् |
| पुस्तकागारे | – | पुस्तक + आगारे |
| आत्मसादसौ | – | आत्मसात् + असौ |
| अवाप्य | – | अव + आप्य |
| नाजानताम् | – | न + अजानताम् |
| पितरावस्य | – | पितरौ + अस्य |
| वर्षान्तरेऽसौ | – | वर्ष + अन्तरे + असौ |
| समितिसदस्यास्तस्य | – | समितिसदस्याः + तस्य |
| श्रमेणाभ्यासेन | – | श्रमेण + अभ्यासेन |
| व्यतीत्य | – | त्रि + अति + इत्य |
| उपैति | – | उप + एति |

## पदार्थाः

| | | | | |
|---|---|---|---|---|
| क्लिष्टजीवनाः | – | कठिनजीवनाः | – | कठिनाई से जीवन जीनेवाले |
| आतपमात्रात् | – | घर्ममात्रात् | – | धूप मात्र से |
| जीर्णप्रायत्वात् | – | जर्जरत्वात् | – | लगभग जर्जर होने से |
| कनीयसी | – | लघीयसी | – | छोटी |
| सामाजिकसामरस्यरसिकः | – | सामाजिकसमरसताप्रियः | – | सामाजिक समरसता के पक्षपाती |

| | | |
|---|---|---|
| नवीनदृष्टिसम्पन्नः | - नवदृष्टियुक्तः | - नवीन दृष्टि से युक्त |
| समागतः | - समागतवान् | - आया (आए) |
| खेलनरतम् | - क्रीडारतम् | - खेलने में मग्न |
| विलोक्य | - दृष्ट्वा | - देखकर |
| आपातरमणीयेन | - तत्क्षणरम्येन | - तत्क्षण रमणीय, सहज आकर्षक (से) |
| अभिभूतः | - प्रभावितः | - प्रभावित |
| शिक्षितुमारभत | - पाठयितुं लग्नः | - पढ़ाने लगा (लगे) |
| स्वाध्यवसायेन | - स्वपरिश्रमेण | - अपने परिश्रम से |
| विद्याधिगमाय | - विद्याप्राप्तये | - विद्यालाभ के लिए |
| निरतः | - तल्लीनः | - तत्पर |
| प्राथम्यम् | - प्रथमस्थानम् | - प्रथम स्थान को |
| प्राप | - अवाप | - प्राप्त किया |
| भूयो भूयः | - वारंवारम् | - बार-बार |
| उपदिष्टः | - प्राप्तोपदेशः/शासितः | - उपदेश प्राप्त |
| अर्थाभावे | - धनाभावे | - धन के अभाव में |
| सावहितचेतसा | - सावधानमनसा | - सावधान मन से |
| अकृतकालक्षेपः | - अकृतसमयनाशः | - समय न गँवानेवाला |
| साक्षात्कारे | - अन्तर्वीक्षायाम् | - साक्षात्कार में, इण्टरव्यू में |
| अभूवन् | - अभवन् | - हुए |
| प्रीताः | - प्रसन्नाः | - प्रसन्न |
| प्रभूता | - अत्यधिका | - बहुत अधिक |
| आवर्जकम् | - आकर्षकम् | - आकर्षक |
| व्यतीत्य | - नीत्वा | - बिताकर |
| सञ्जातः | - अभवत् | - हो गया |

| | | |
|---|---|---|
| उक्तम् | कथितम् | कहा गया है |
| उपैति | प्राप्नोति | प्राप्त करती है (करता है) |

## व्याकरणम्

**समासः**

| | | |
|---|---|---|
| कर्मवीरः | कर्मणि वीरः | (सप्तमी तत्पुरुषः) |
| निजोत्साहेन | निजः उत्साहः तेन | (कर्मधारयः) |
| विहारराज्यस्य | विहारः चासौ राज्यम्, तस्य | (कर्मधारयः) |
| परिवारजनान् | परिवारस्य जनान् | (षष्ठी तत्पुरुषः) |
| नवीनदृष्टिसम्पन्नः | नवीना दृष्टिः यथा सम्पन्नः | (तृतीया तत्पुरुषः) |
| सामाजिके सामरस्ये रसिकः | सामाजिकसामरस्यरसिकः | (सप्तमी तत्पुरुषः) |
| अर्थाभावे | अर्थस्य अभावे | (षष्ठी तत्पुरुषः) |
| क्लिष्टजीवनाः | क्लिष्टं जीवनं येषां, ते | (बहुव्रीहिः) |
| खेलनरतम् | खेलने रतम् | (सप्तमी तत्पुरुषः) |
| दलितबालकम् | दलितश्चासौ बालकः, तम् | (कर्मधारयः) |
| आपातरमणीयेन | आपातेन रमणीयः तेन | (तृतीया तत्पुरुषः) |
| विद्याधिगमाय | विद्यायाः अधिगमाय | (षष्ठी तत्पुरुषः) |
| शिक्षणलब्धेन | शिक्षणेन लब्धेन | (तृतीया तत्पुरुषः) |
| सावहितचेतसा | सावहितं चेतः, तेन | (कर्मधारय) |
| अकृतकालक्षेपः | न कृतः कालस्य क्षेपः येन, सः, | (बहुव्रीहि) |
| विश्वविद्यालयपरिसरे | विश्वविद्यालयस्य परिसरे | (षष्ठी तत्पुरुषः) |
| पुरुषसिंहम् | पुरुषः सिंह इव, तम् | (कर्मधारयः) |
| शिक्षाविहीना | शिक्षया विहीनाः | (तृतीय तत्पुरुषः) |

## प्रकृतिप्रत्ययविभागः

| | | |
|---|---|---|
| निरतः | - | नि + रम् + क्त |
| अध्यापनम् | - | अधि + इङ् + णिच् + ल्युट् |
| लब्धम् | - | लभ् + क्त |
| ख्यातिम् | - | ख्यै + क्तिन् (द्वि. ए. व.) |
| कृतवान् | - | कृ + क्तवतु |
| उपदिष्टः | - | उप + दिश् + क्त |
| अभिभूतः | - | अभि + भू + क्त |
| आकृष्टः | - | आङ् + कृष् + क्त |
| ज्ञानेन | - | ज्ञा + ल्युट् (तृ. ए. व.) |
| प्रीताः | - | प्री + क्त (प्र. ब. व.) |
| सञ्जातः | - | सम् + जन् + क्त |
| व्यतीत्य | - | वि + अति + इण् + ल्यप् |
| कृतेन | - | कृ + क्त (तृ. ए. व.) |

## अभ्यासः
### ( मौखिकः )

1. **एकपदेन उत्तरं वदत -**

    (क) कर्मवीरः कः अस्ति ?

    (ख) बिहारप्रान्तस्य दुर्गमप्राये प्रान्तरे कः ग्रामः अस्ति ?

    (ग) 'भीखनटोला' ग्रामे शिक्षकः कं दृष्टवान् ?

    (घ) कर्मवीरः रामप्रवेशः कुत्र उन्नतं स्थानं प्राप्तवान् ?

    (ङ) केन कर्मवीरः उन्नतं स्थानमवाप ?

## अभ्यासः

### ( लिखितः )

1. **एकपदेन उत्तरं लिखत -**

(क) रामप्रवेशस्य ग्रामस्य नाम किम् अस्ति ?

(ख) भीखनटोलां द्रष्टुं कः आगतः ?

(ग) बालकः कस्य शिक्षणशैल्याकृष्टः ?

(घ) स्नातकपरीक्षायां प्रथमस्थानं प्राप्य कस्य ख्यातिमवर्धयत् ?

(ङ) उद्योगिनं पुरुषसिंहं का उपैति ?

2. **पूर्णवाक्येन उत्तरं लिखत -**

(क) 'भीखनटोला' ग्रामः कुत्र अस्ति ?

(ख) प्राथमिकविद्यालये कीदृशः शिक्षकः समागतः ?

(ग) शिक्षकः कं शिक्षितुमारभत ?

(घ) रामप्रवेशः कस्यां परीक्षायाम् उन्नतं स्थानमवाप ?

(ङ) कयोः अर्थाभावेऽपि रामप्रवेशः महाविद्यालये प्रवेशमलभत ?

(च) साक्षात्कारे समितिसदस्याः किमर्थं प्रीताः अभवन् ?

(छ) रामप्रवेशस्य प्रतिष्ठा कुत्र-कुत्र दृश्यते ?

(ज) लक्ष्मीः कीदृशं जनम् उपैति ?

3. **उदाहरणम् अनुसृत्य रक्षति/त्रायते क्रियापदस्य प्रयोगं कृत्वा मञ्जूषातः पदानि चित्वा, तत्र समुचितविभक्तिं संयोज्य सप्त वाक्यानि रचयत -**

उदाहरणम् - (क) गृहं सूर्यस्य आतपात् मेघस्य वर्षणात् च त्रायते।

(ख) पिता पुत्रं विघ्नात् रक्षति।

पद्मजा, देवदत्तः, रमेशः, करीमः, शैलेशः, दिव्येशः, शत्रुः, पवनः, वेगः, रोगः, वैद्यः, चौरः, प्रहरी, सैनिकः, देशः, आतङ्कवादी, लुण्ठकः, धर्मात्मा, पापम्, सज्जनः, दोषः

4. निम्नाङ्कितानां समस्तपदानां विग्रहं कृत्वा समासनामानि लिखत –

(क) अकृतकालक्षेपः

(ख) पुस्तकागारम्

(ग) स्नातकपरीक्षायाम्

(घ) दलितबालकम्

(ङ) विलष्टजीवनाः

(च) नवीनदृष्टिसम्पन्नः

(छ) सामाजिकसामरस्यसम्पन्नः

(ज) स्वाध्यायनिरतः

5. पठितपाठम् अनुसृत्य निम्नलिखितपदानां पर्यायरूपाणि लिखत –

(उदाहरणम् – पुस्तकालयः – पुस्तकागारम्)

(क) कठिनजीविता:

(ख) अकृतसमयनाशः

(ग) क्षमता

(घ) जनप्रियः

(ङ) आकर्षकम्

(च) संलग्नः

(छ) परिश्रमः

(ज) धनाभावः

(झ) सावधानमनसा

(ञ) सद्यः आकर्षकेण

## योग्यताविस्तारः

प्रस्तुतपाठः कर्मणः परिश्रमस्य महत्त्वं चित्रयति। विद्या अभ्यासानुसारिणी। कस्यापि उन्नतवंशस्य सुरक्षितनिधिः नास्तीयं विद्या। अतः सत्यनिष्ठया मनोयोगेन अध्यवसायेन अर्जिता विद्या सफला यशस्करी च भवति। अयं पाठः उपदिशति यत् निर्धनः, दलितः, शोषितः, वञ्चितः अपि बालः आचार्यस्य सम्यग् निर्देशनेन पठित्वा-लिखित्वा विज्ञो भूत्वा देशस्य विश्वस्य शीर्षस्थः जनः संजायते। सामाजिकविज्ञानस्य शिक्षकाणां सहयोगेन अमेरिकादेशेषु कर्मवीराणां दलित-शोषित-वर्गाणां राजनायकानां चरितानि संगृह्णीयात्।

2. स्वदेशस्य बाबासाहेबभीमराव-अम्बेदकरस्य जगजीवनरामस्य, कर्पूरीठाकुरस्य तथान्येषाम् उपेक्षितवर्गाणां कर्मवीराणां राजनीतिज्ञानां ज्ञानं प्राप्नुयात्।

3. दलितवसतिषु अभियानं चालयित्वा सामाजिकसमरसतायाः वैदिकः सन्देशः श्रावणीयः यथायोग्यं व्यावहारिकः कार्यक्रमः यथा- प्रीतिभोजः, सामूहिकः उत्सवः चादयः आयोजनीयाः।

**समरसतामन्त्रः -**

सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे सञ्जानाना उपासते।।
समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्।
समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि।। (ऋग- 10.12.19)

4. **परिश्रमस्य महत्त्वं संस्कृतगीतेषु दृश्यते। यथा-**

प्रयत्नेन कार्ये सुसिद्धिर्जनानां
प्रयत्नेन सद्बुद्धिवृद्धिर् जनानाम्।
प्रयत्नेन युद्धे जयः स्याज्-जनानां
प्रयत्नो विधेयः प्रयत्नो विधेयः।।
प्रयत्नेन धीराः समुद्रं तरन्ति।
प्रयत्नेन वीरा गिरीन् लंघयन्ति ।

प्रयत्नेन मूर्खाः सुयोग्या भवन्ति।

प्रयत्नो विधेयः प्रयत्नो विधेयः।।

5. **गीतायाः उपदेशः** -

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।

मा कर्मफलहेतुर्भूर्माते सङ्गोऽस्त्वकर्मणि।।

ABDIEL SOLUTIONS ABSOL PATNA

नवमः पाठः

# स्वामी दयानन्दः



**( आधुनिकभारते समाजस्य शिक्षायाश्च महान् उद्धारकः स्वामी दयानन्दः। आर्यसमाजनामकसंस्थायाः संस्थापनेन एतस्य प्रभूतं योगदानं भारतीयसमाजे गृह्यते। भारतवर्षे राष्ट्रीयतायाः बोधोऽपि अस्य कार्यविशेषः। समाजे अनेकाः दूषिताः प्रथाः खण्डयित्वा शुद्धतत्त्वज्ञानस्य प्रचारं दयानन्दः अकरोत्। अयं पाठः स्वामिनो दयानन्दस्य परिचयं तस्य समाजोद्धरणे योगदानं च निरूपयति। )**

मध्यकाले नाना कुत्सितरीतयः भारतीयं समाजम् अदूषयन्। जातिवादकृतं वैषम्यम्, अस्पृश्यता, धर्मकार्येषु आडम्बरः, स्त्रीणामशिक्षा, विधवानां गर्हिता स्थितिः, शिक्षायाः अव्यापकता इत्यादयः दोषाः प्राचीनसमाजे आसन्। अतः अनेके दलिताः हिन्दुसमाजं तिरस्कृत्य धर्मान्तरणं स्वीकृतवन्तः। एतादृशे विषमे काले ऊनविंशशतके केचन धर्मोद्धारकाः सत्यान्वेषिणः समाजस्य वैषम्यनिवारकाः भारते वर्षे

प्रादुरभवन्। तेषु नूनं स्वामी दयानन्दः विचाराणां व्यापकत्वात् समाजोद्धरणस्य संकल्पाच्च शिखर-स्थानीयः।

स्वामिनः जन्म गुजरातप्रदेशस्य टंकारानामके ग्रामे 1824 ईस्वी वर्षेऽभूत्। बालकस्य नाम मूलशङ्करः इति कृतम्। संस्कृतशिक्षया एवाध्ययनस्यास्य प्रारम्भो जातः। कर्मकाण्डिपरिवारे तादृश्येव व्यवस्था तदानीमासीत्। शिवोपासके परिवारे मूलशङ्करस्य कृते शिवरात्रिमहापर्व उद्बोधकं जातम्। रात्रिजागरणकाले मूलशङ्करेण दृष्टं यत् शङ्करस्य विग्रहमारुह्य मूषकाः विग्रहार्पितानि द्रव्याणि भक्षयन्ति। मूलशङ्करोऽचिन्तयत् यत् विग्रहोऽयमकिञ्चित्करः। वस्तुतः देवः प्रतिमायां नास्ति। रात्रिजागरणं विहाय मूलशङ्करः गृहं गतः। ततः एव मूलशङ्करस्य मूर्तिपूजां प्रति अनास्था जाता। वर्षद्वयाभ्यन्तरे एव तस्य प्रियायाः स्वसुर्निधनं जातम्। ततः मूलशङ्करे वैराग्यभावः समागतः। गृहं परित्यज्य विभिन्नानां विदुषां सतां साधूनाञ्च सङ्गतौ रममाणोऽसौ मथुरायां विरजानन्दस्य प्रज्ञाचक्षुषः विदुषः समीपमगमत्। तस्मात् आर्षग्रन्थानामध्ययनं प्रारभत। विरजानन्दस्य उपदेशात् वैदिकधर्मस्य प्रचारे सत्यस्य प्रसारे च स्वजीवनमसावर्पितवान्। यत्र-तत्र धर्माडम्बराणां खण्डनमपि स चकार। अनेके पण्डिताः तेन पराजिताः तस्य मते च दीक्षिताः।

स्त्रीशिक्षायाः विधवाविवाहस्य मूर्तिपूजाखण्डनस्य अस्पृश्यतायाः बालविवाहस्य च निवारणस्य तेन महान् प्रयासः विभिन्नैः समाजोद्धारकैः सह कृतः। स्वसिद्धान्तानां सङ्कलनाय सत्यार्थप्रकाशनामकं ग्रन्थं राष्ट्रभाषायां विरच्य स्वानुयायिनां स महान्तमुपकारं चकार। किञ्च वेदान् प्रति सर्वेषां धर्मानुयायिनां ध्यानमाकर्षयन् स्वयं वेदभाष्याणि संस्कृतहिन्दीभाषयोः रचितवान्। प्राचीनशिक्षायां दोषान् दर्शयित्वा नवीनां शिक्षां पद्धतिमसावदर्शयत्। स्वसिद्धान्तानां कार्यान्वयनाय 1875 ईस्वी वर्षे मुम्बईनगरे आर्यसमाजसंस्थायाः स्थापनां कृत्वा अनुयायिनां कृते मूर्तरूपेण समाजस्य संशोधनोद्देश्यं प्रकटितवान्।

सम्प्रति आर्यसमाजस्य शाखाः प्रशाखाश्च देशे विदेशेषु च प्रायेण प्रतिनगरं वर्तन्ते। सर्वत्र समाजदूषणानि शिक्षामलानि च शोधयन्ति। शिक्षापद्धतौ गुरुकुलानां डी० ए० वी० (दयानन्द एंग्लो वैदिक) विद्यालयानाञ्च समूहः स्वामिनो दयानन्दस्य मृत्योः (1883 ईस्वी) अनन्तरं प्रारब्धः तदनुयायिभिः। वर्तमानशिक्षापद्धतौ समाजस्य प्रवर्तने च दयानन्दस्य आर्यसमाजस्य च योगदानं सदा स्मरणीयमस्ति।

## शब्दार्थाः

| | | | | |
|---|---|---|---|---|
| अदूषयन् | - | दूषितं कृतवन्तः | - | दूषित किया |
| वैषम्यम् | - | असमानता | - | विषमता |

| | | | | |
|---|---|---|---|---|
| गर्हिताः | - | निकृष्टा | - | निन्दित |
| निवारकाः | - | अपहारकाः | - | दूर करनेवाले |
| नूनम् | - | अवश्यम् | - | निश्चय |
| विग्रहम् | - | मूर्त्तिम् | - | मूर्त्ति (प्रतिमा) |
| अकिञ्चित्करः | - | तुच्छः | - | साधारण |
| विहाय | - | त्यक्त्वा | - | छोड़कर |
| अनास्था | - | उदासीनता | - | आस्था का अभाव (तटस्थता) |
| परित्यज्य | - | विहाय | - | छोड़कर |
| प्रज्ञाचक्षुषः | - | अन्धस्य | - | अन्धे का |
| दीक्षिताः | - | दीक्षां प्राप्ताः | - | दीक्षित |
| सम्प्रति | - | अधुना | - | इस समय |
| अनन्तरम् | - | पश्चात् | - | बाद में |

## व्याकरणम्

### सन्धिविच्छेदः

| | | |
|---|---|---|
| इत्यादयः | - | इति + आदयः |
| धर्मान्तरम् | - | धर्म + अन्तरम् |
| धर्मोद्धारकाः | - | धर्म + उद्धारकाः |
| सत्यान्वेषिणः | - | सत्य + अन्वेषिणः |
| प्रादुरभवन् | - | प्रादुः + अभवन् |
| संकल्पाच्च | - | संकल्पात् + च |
| वर्षेऽभूत् | - | वर्षे + अभूत् |
| एवाध्ययनस्यास्य | - | एव + अध्ययनस्य + अस्य |
| तादृश्येव | - | तादृश्य + एव |
| शिवोपासके | - | शिव + उपासके |
| विग्रहार्पितानि | - | विग्रह + अर्पितानि |

| | | |
|---|---|---|
| मूलशङ्करोऽचिन्तयत् | – | मूलशङ्करः + अचिन्तयत् |
| विग्रहोऽयम् | – | विग्रहः + अयम् |
| स्वसुर्निधनम् | – | स्वसुः + निधनम् |
| साधूनाञ्च | – | साधूनाम् + च |
| रममाणोऽसौ | – | रममाणः + असौ |
| स्वजीवनमसावर्पितवान् | – | स्वजीवनम् + असौ + अर्पितवान् |
| समाजोद्धारकैः | – | समाज + उद्धारकैः |
| पद्धतिमसावदर्शयत् | – | पद्धतिम् + असौ + अदर्शयत् |
| संशोधनोद्देश्यम् | – | संशोधन + उद्देश्यम् |
| विद्यालयानाञ्च | – | विद्यालयानाम् + च |

**प्रकृतिप्रत्ययविभागः**

| | | |
|---|---|---|
| जातम् | – | जन् + क्त |
| आरुह्य | – | आ + रुह् + ल्यप् |
| दृष्टम् | – | दृश् + क्त |
| गतः | – | गम् + क्त |
| जाता | – | जन् + क्त + टाप् |
| समागतः | – | सम + आ + गम् + क्त |
| परित्यज्य | – | परि + त्यज् + ल्यप् |
| अगमत् | – | गम्, लुङ् (प्रथमपुरुषः, एकवचनम्) |
| प्रारभत | – | प्र + आ + रभ् + लङ् (प्रथमपुरुषः, एकवचनम्) |
| चकार | – | कृ + लिट् (प्रथमपुरुषः, एकवचनम्) |
| विरच्य | – | वि + रच् + ल्यप् |
| कृत्वा | – | कृ + त्वा |
| प्रारब्धः | – | प्र + आ + रभ् + क्त |

स्मरणीयम् - स्मृ + अनीयर्

दर्शयित्वा - दृश् + णिच् + क्त्वा

**समासः**

कुत्सितरीतयः - कुत्सिताश्च ताः रीतयः, कर्मधारयः

अव्यापकता - न व्यापकता, नञ् समासः

धर्मान्तरणम् - धर्मस्य अन्तरणम् (परिवर्तनम्), षष्ठी तत्पुरुषः

धर्मोद्धारकाः - धर्मस्य उद्धारकाः, षष्ठी तत्पुरुषः

सत्यान्वेषिणः - सत्यस्य अन्वेषिणः, षष्ठी तत्पुरुषः

वैषम्यनिवारकाः - वैषम्यस्य निवारकाः, षष्ठी तत्पुरुषः

शिवोपासकः - शिवस्य उपासकः, षष्ठी तत्पुरुषः

रात्रिजागरणकालः - रात्रौ जागरणं, तस्य कालः, षष्ठी तत्पुरुषः

विग्रहार्पितानि - विग्रहे अर्पितम्, तानि, सप्तमी तत्पुरुषः

अकिञ्चित्करः - न किञ्चित् कर्तुं समर्थः, नञ् तत्पुरुषः

मूर्तिपूजा - मूर्तेः पूजा, षष्ठी तत्पुरुषः

धर्माडम्बरः - धर्मस्य आडम्बरः, षष्ठी तत्पुरुषः

समाजदूषणनि - समाजस्य दूषणानि, षष्ठी तत्पुरुषः

शिक्षापद्धति - शिक्षायाः पद्धतिः, षष्ठी तत्पुरुषः

प्रज्ञाचक्षुषः - प्रज्ञा चक्षुःयस्य तस्य (अन्धस्य) षष्ठी तत्पुरुषः

जातिवादकृतम् - जातिवादेन कृतम्, तृतीया तत्पुरुषः

संस्कृतशिक्षा - संस्कृतस्य शिक्षा, षष्ठी तत्पुरुषः

## अभ्यासः

## ( मौखिकः )

1. स्वामिनः दयानन्दस्य विषये द्वे वाक्ये वदत।
2. अधोलिखितानां समस्तपदानां विग्रहं वदत -

   धर्मोद्धारकः, सत्यान्वेषी, वैषम्यनिवारकः, शिखरस्थानीयः, संस्कृतशिक्षा
3. सन्धिविच्छेदं कुरुत -

   संकल्पाच्च, धर्मान्तरम्, समाजोद्धरणस्य, सत्यान्वेषिणः, विग्रहार्पितानि
4. पञ्च अव्ययपदानि वदत ।

## अभ्यासः

## ( लिखितः )

1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत -

   (क) मध्यकाले काः भारतीयं समाजम् अदूषयन् ?

   (ख) के हिन्दुसमाजं तिरस्कृत्य धर्मान्तरणं स्वीकृतवन्तः ?

   (ग) स्वामिनः दयानन्दस्य जन्म कुत्र अभवत् ?

   (घ) विग्रहार्पितानि द्रव्याणि के भक्षयन्ति ?

   (ङ) रात्रिजागरणं विहाय मूलशङ्करः कुत्र गतः ?
2. निम्नलिखितानां पदानां सन्धिविच्छेदं कुरुत –

   एवाध्ययनस्यास्य, विग्रहमारुह्य, वर्षेऽभूत्, स्वजीवनमसावर्पितवान्, समाजोद्धारकैः, विद्यालयानाञ्च।
3. अधोलिखितवाक्येषु कोष्ठात् समुचितं पदमादाय रिक्तस्थानानि पूरयत –

   (क) स्वामी दयानन्दः ........................ आसीत्। (समाजोद्धारकः / कृषकः)

   (ख) बालकस्य नाम ........................ इति कृतम्। (मूलविष्णुः / मूलशङ्करः)

   (ग) शङ्करस्य विग्रहमारुह्य ................ विग्रहार्पितानि द्रव्याणि भक्षयन्ति। (खगाः / मूषकाः)

(घ) रात्रिजागरणं विहाय मूलशङ्करः ..................... गतः। (गृहम् / विद्यालयम्)

(ङ) स्वामी दयानन्दः ................. संस्थापकः आसीत्। (आर्यसमाजस्य / सिखसमाजस्य)

4. निम्नलिखितानां पदानां प्रकृतिप्रत्ययविभागं कुरुत –

दर्शयित्वा, विरच्य, परित्यज्य, स्मरणीयम्, दृष्टम्, कृतम्, गतः

5. कोष्ठकस्थेभ्यः धातुभ्यः उचितप्रत्ययं योजयित्वा रिक्तस्थानानि पूरयत –

(क) प्राचीनसमाजे अनेके दोषाः .....................। (अस्)

(ख) तस्य जन्म 1824 ईस्वी वर्षे ..................... । (भू)

(ग) बालकस्य नाम मूलशङ्करः इति ..................... । (कृ)

(घ) दयानन्दस्य योगदानं सदा .....................। (स्मृ)

(ङ) ततः मूलशङ्करे वैराग्यभावः ..................... । (गम्)

6. अधोलिखितानां पदानां संस्कृतवाक्येषु प्रयोगं कुरुत –

मूषकः, विद्वान्, धर्मोद्धारकः, अगच्छत्, सह

7. निम्नलिखितानां पदानां विपरीतार्थकपदानि लिखत –

विद्वान्, दोषः, पराजितः, अनास्था, उपकारम्, प्रारम्भः, गर्हितः, वैषम्यम्

8. अधोलिखितेषु पदेषु धातुयुक्तम् उचितं प्रत्ययं निर्दिशत –

(क) गतः - गम् + ................ (घञ् / क्तः)

(ख) गत्वा - गम् + ................ (ल्युट् / क्त्वा)

(ग) गमनीयम् - गम् + ................ (अनीयर् / ल्यप्)

(घ) उपगम्य - गम् + ................ (ल्यप् / क्त्वा)

(ङ) गन्तुम् - गम् + ................ (यत् / तुमुन्)

9. अधोलिखितानि रेखाङ्कितपदानि बहुवचने परिवर्तयत –

(क) सः <u>ग्रन्थं</u> विरच्य महान्तम् उपकारम् अकरोत्।

(ख) सः प्राचीनशिक्षायां <u>दोषम्</u>ः अदर्शयत्।

(ग) सः <u>गृहम्</u> अपश्यत्।

(घ) तत्र <u>देव:</u> <u>पूजित:</u>।

(ङ) स: <u>खगं</u> पश्यति।

**10. अधोलिखितं रेखाङ्कितपदमनुसृत्य प्रश्ननिर्माणं कुरुत –**

(क) मध्यकाले <u>धर्मकार्येषु</u> आडम्बर: आसीत्।

(ख) तत्र विधवानां स्थिति: <u>गर्हिता</u> अस्ति।

(ग) <u>बालकस्य</u> नाम मूलशङ्कर: आसीत्।

(घ) <u>मूलशङ्कर:</u> मेधावी आसीत्।

(ङ) <u>आर्यसमाजस्य</u> शाखा: देशे विदेशेषु च वर्तन्ते।

(च) मूलशङ्करस्य <u>मूर्तिपूजां</u> प्रति अनास्था जाता।

(छ) <u>गृहं</u> परित्यज्य स: गत:।

**11. अधोलिखितेषु पदेषु प्रयुक्तां विभक्तिं लिखत –**

सत्यान्वेषिण:, विधवानाम्, विषमे, धर्मोद्धारका:, तेषु, प्रतिमायाम्, वैदिकधर्मस्य, संस्कृतेन।

## योग्यताविस्तार:

**आर्यसमाजस्य मूलोद्देश्यानि सन्ति -**

1. विश्वकल्याणम्
2. ज्ञानज्योतिर्विस्तार:
3. ईश्वरस्य सर्वोच्चता, सर्वज्ञता - सर्वज्ञानमयो हि स:।
4. वेदानां प्रचार: प्रसारश्च।
5. कर्त्तव्याकर्त्तव्यज्ञानम्
6. सर्वजनसमरूपता
7. परहितम्
8. सत्यस्य ग्रहणम् असत्यस्य त्यागश्च

'आर्य'- शब्दस्य अर्थ: अस्ति -

ABDIEL SOLUTIONS ABSOL PATNA

आर्यावर्तवासी, सभ्यः, श्रेष्ठः, सम्मान्यश्च।

'योऽहमार्येण परवान् भ्रात्रा ज्येष्ठेन भामिनि' (रामायणम्, द्वितीयं काण्डम्)

'स्मृति'- ग्रन्थानुसारम् -

कर्त्तव्यमाचरन् काममकर्त्तव्यमनाचरन्।

तिष्ठति प्राकृताचारे स तु आर्य इति स्मृतः॥

विभिन्नैः धार्मिकचिन्तकैः सह दयानन्दस्य सम्पर्कः जातः।

यथा-

देवेन्द्रनाथ ठाकुरः, केशवचन्द्र सेनः (ब्रह्मसमाजः)

मैडम ब्लौवाट्स्की तथा कर्नल आलकॉटः (थियोसॉफिकल सोसाइटी)

भोलानाथ साराभाई (प्रार्थनासमाजः)

सर सैयदः (संशोधितः इस्लामः) च।

दशमः पाठः

# मन्दाकिनीवर्णनम्



(प्रस्तुतः पाठः वाल्मीकीयरामायणस्य अयोध्याकाण्डस्य पञ्चनवति (95) तमात् सर्गात् संकलितः। वनवासप्रसङ्गे रामः सीतया लक्ष्मणेन च सह चित्रकूटं प्राप्नोति। तत्रस्थितां मन्दाकिनीनदीं वर्णयन् सीतां सम्बोधयति। इयं नदी प्राकृतिकैरुपादानैः संवलिता चित्तं हरति। अस्याः वर्णनं कालिदासो रघुवंशकाव्येऽपि (त्रयोदशसर्गे) करोति। अनुष्टुप्छन्दसि महर्षिः वाल्मीकिः मन्दाकिनीवर्णने प्रकृतेः यथार्थ चित्रणं करोति।)

विचित्रपुलिनां रम्यां हंससारससेविताम् ।
कुसुमैरुपसंपन्नां पश्य मन्दाकिनीं नदीम् ॥1॥
नानाविधैस्तीररुहैर्वृतां पुष्पफलद्रुमैः ।
राजन्तीं राजराजस्य नलिनीमिव सर्वतः ॥2॥

मृगयूथनिपीतानि कलुषाम्भांसि साम्प्रतम् ।
तीर्थानि रमणीयानि रतिं संजनयन्ति मे ॥3॥

जटाजिनधराः काले वल्कलोत्तरवाससः ।
ऋषयस्त्ववगाहन्ते नदीं मन्दाकिनीं प्रिये ॥4॥

आदित्यमुपतिष्ठन्ते नियमादूर्ध्वबाहवः ।
एते परे विशालाक्षि मुनयः संशितव्रताः ॥5॥

मारुतोद्धूतशिखरैः प्रनृत्त इव पर्वतः ।
पादपैः पुष्पपत्राणि सृजद्भिरभितो नदीम् ॥6॥

क्वचिन्मणिनिकाशोदां क्वचित्पुलिनशालिनीम् ।
क्वचित्सिद्धजनाकीर्णां पश्य मन्दाकिनीं नदीम् ॥7॥

निर्धूतान् वायुना पश्य विततान् पुष्पसञ्चयान् ।
पोप्लूयमानानपरान्पश्य त्वं जलमध्यगान् ॥8॥

तांश्चातिवल्गुवचसो रथाङ्गाह्वयना द्विजाः ।
अधिरोहन्ति कल्याणि निष्कूजन्तः शुभा गिरः ॥9॥

दर्शनं चित्रकूटस्य मन्दाकिन्याश्च शोभने ।
अधिकं पुरवासाच्च मन्ये तव च दर्शनात् ॥10॥

## अन्वयाः

(हे सीते !) कुसुमैः उपसम्पन्नां, विचित्रपुलिनां, हंससारससेवितां (च) रम्यां मन्दाकिनीं नदीं पश्य ॥1॥

(हे सीते !) नानाविधैः तीररुहैः पुष्पफलद्रुमैः सर्वतः वृतां राजन्तीं (च) (मन्दाकिनीम्) राजराजस्य नलिनीम् इव (पश्य) ॥2॥

(हे सीते !) साम्प्रतं मृगयूथनिपीतानि कलुषाम्भांसि रमणीयनि तीर्थानि मे रतिं संजनयन्ति ॥3॥

हे प्रिये ! काले जटाजिनधराः वल्कलोत्तरवाससः ऋषयः तु मन्दाकिनीं नदीम् अवगाहन्ते ॥4॥

हे विशालाक्षि ! एते परे संशितव्रताः मुनयः ऊर्ध्वबाहवः नियमात् आदित्यम् उपतिष्ठन्ते ।। 5।।

(हे विशालाक्षि !) नदीम् अभितः पुष्पपत्राणि सृजद्भिः पादपैः मारुतोद्धूतशिखरैः पर्वतः प्रनृत्त इव ।। 6।।

(हे विशालाक्षि !) क्वचित् मणिनिकाशोदां क्वचित् पुलिनशालिनीम् क्वचित् सिद्धजनाकीर्णां मन्दाकिनीं नदीं पश्य ।। 7।।

हे तनुमध्यमे ! त्वं पश्य, वायुना निर्धूतान् विततान् पुष्पसंचयान् अपरान् (च) पोप्लूयमनान् जलमध्यगान् (पुष्पसंचयान् नदीम् अभितः) पश्य ।। 8।।

हे कल्याणि ! पश्य ! (नदीम् अभितः) वल्गुवचसः रथाङ्गाह्वयना: द्विजाः च शुभाः गिरः निष्कूजन्तः तान् अधिरोहन्ति ।।9।।

हे शोभने ! (अत्र) चित्रकूटस्य मन्दाकिन्याः च (यत्) दर्शनं (भवति) (तत्) तव दर्शनात् च पुरवासात् च अधिकं मन्ये ।।10।।

## शब्दार्थाः

| | | | | |
|---|---|---|---|---|
| विचित्रपुलिनाम् | - | विविधवर्णतीराम् | - | रंग-बिरंगे तटों वाली |
| रम्याम् | - | रमणीयाम् | - | सुन्दर को |
| कुसुमैः | - | पुष्पैः | - | फूलों से |
| द्रुमैः | - | वृक्षैः | - | वृक्षों से |
| राजन्तीम् | - | शोभमानाम् | - | सुशोभित होती हुई |
| नलिनीम् | - | पुष्करिणीम् | - | पोखर, तालाब को |
| मृगयूथनिपीतानि | - | पशुसमूहनिपीतानि | - | पशु समूह द्वारा पीये गये |
| कलुषाम्भांसि | - | दूषितानि जलानि | - | गन्दे जल |
| रमणीयानि | - | मनोहराणि | - | मन को मोहित करने वाले |
| जटाजिनधराः | - | जटाधारिणः मृगचर्मधारिणश्च | - | जटा और मृगचर्मधारण करने वाले |
| वल्कलोत्तरवाससः | - | वृक्षत्वग्रूपवस्त्रधारिणः | - | वृक्ष की छाल को वस्त्र के रूप में धारण करनेवाले |

ABDIEL SOLUTIONS ABSOL PATNA

| | | |
|---|---|---|
| ऊर्ध्ववाहवः - | कृतोपरिभुजाः - | जिन्होंने अपनी भुजा को ऊपर किया है |
| विशालाक्षि - | विशालनेत्रे - | बड़ी-बड़ी आँखों वाली |
| संशितव्रताः - | प्रशंसितव्रताः - | प्रशंसनीय व्रत वाले |
| मारुतोद्धूतशिखरैः - | पवनान्दोलितशृङ्गैः - | हवा के द्वारा चोटियों को उड़ाते हुए |
| मणिनिकाशोदाम् - | मणिसमानजलाम् - | मणि जैसे जल बाली |
| निर्धूतान् - | विकीर्णान् - | उड़ाए गये |
| विततान् - | विस्तृतान् - | विस्तार किये गये |
| द्विजाः - | खगाः - | पक्षी |
| रथाङ्गाह्वयनाः - | चक्रवाकाः - | चकवे |
| वल्गुवचसः - | मधुरवचनाः - | मीठी बोली वाले |
| पोप्लूयमानान् - | उत्प्लवमानान् - | तैरते हुए |
| राजराजस्य - | कुबेरस्य - | कुबेर का |
| नलिनीम् - | पुष्करिणीम् - | पोखर, तालाब को |

## व्याकरणम्

### सन्धि-विच्छेदः

| | |
|---|---|
| कुसुमैरुपसम्पन्नाम् - | कुसुमैः + उपसम्पन्नाम् |
| नानाविधैस्तीररुहैर्वृता - | नानाविधैः + तीररुहैः + वृता |
| कलुषाम्भांसि - | कलुष + अम्भांसि |
| ऋषयस्त्ववगाहन्ते - | ऋषयः + तु + अवगाहन्ते |
| नियमादूर्ध्वबाहवः - | नियमात् + ऊर्ध्वबाहवः |
| विशालाक्षि - | विशाल + अक्षि |
| सृजद्भिरभितः - | सृजद्भिः + अभितः |

| | | |
|---|---|---|
| क्वचिन्मणिनिकाशोदाम् | - | क्वचित् + मणिनिकाश + उदाम् |
| सिद्धजनाकीर्णाम् | - | सिद्धजन + आकीर्णाम् |
| तांश्चातिवल्गुवचसः | - | तान् + च + अतिवल्गुवचसः |
| मन्दाकिन्याश्च | - | मन्दाकिन्याः + च |
| पुरवासाच्च | - | पुरवासात् + च |

## अभ्यासः
### (मौखिकः)

1. **एकपदेन उत्तरं वदत -**

(क) अस्मिन् पाठे का नदी वर्णिता अस्ति ?

(ख) मन्दाकिनी कस्य नलिनी इव सर्वतः राजते ?

(ग) मन्दाकिनीं नदीं के अवगाहन्ते ?

(घ) रामः मन्दाकिनीम् नदीं कां दर्शयति ?

(ङ) मन्दाकिनी-वर्णनं कुतः सङ्गृहीतम् अस्ति ?

(च) मुनयः कम् उपतिष्ठन्ते ?

(छ) कीदृशानि तीर्थानि रतिं सञ्जनयन्ति ?

2. **श्लोकांशं योजयित्वा पूर्णं श्लोकं वदत –**

(क) जटाजिनधरा काले ..........................................।
ऋषयस्त्ववगाहन्ते ..........................................।।

(ख) दर्शनं चित्रकूटस्य ..........................................।
.......................................... मन्ये तव च दर्शनात्।।

## अभ्यासः

### ( लिखितः )

1. **एकपदेन उत्तरं लिखत -**

(क) मन्दाकिनी नदी कस्य पर्वतस्य निकटे प्रवहति ?

(ख) नृत्यति इव कः प्रतिभाति ?

(ग) साम्प्रतं कैः पीतानि जलानि कलुषितानि ?

(घ) ऊर्ध्वबाह्वः के सन्ति ?

(ङ) विशालाक्षि इति कस्याः कृते सम्बोधनम् ?

2. **पूर्णवाक्येन उत्तरं लिखत -**

(क) हंससारससेविता विचित्रपुलिना च का ?

(ख) संशितव्रताः मुनयः किं कुर्वन्ति ?

(ग) श्रीरामः मन्दाकिन्यां पोप्लूयमानान् कान् दर्शयति ?

(घ) सिद्धजनाकीर्णां मन्दाकिनीम् का पश्यति ?

(ङ) "मन्दाकिनी-वर्णनस्य" रचयिता कः ?

(च) "मन्दाकिनी-वर्णनम्" रामायणस्य कस्मिन् काण्डे अस्ति ?

(छ) शुभा गिरः के निष्कूजन्ति ?

3. **रिक्तस्थानानि पूरयत –**

(क) विचित्रपुलिनां रम्यां ……………………………।
…………………… पश्य मन्दाकिनीं नदीम्।।

(ख) क्वचिन्मणिनिकाशोदां क्वचिद् …………………… ।
क्वचित् …………………… पश्य …………… ।।

4. **उदाहरणमनुसृत्य कोष्ठगतपदानां समुचितं प्रयोगं कृत्वा वाक्यानि योजयत –**

उदाहरणम् - मन्दाकिनीं नदी हंससारससेविता कुसुमैरुपसम्पन्ना …………… (नव्या, रम्या, भव्या)

उत्तरम् - मन्दाकिनीं नदीं हंससारससेविता कुसमैरुपसम्पन्ना रम्या अस्ति।

**प्रश्नाः**

(क) सीता रामचन्द्रस्य ........................। (माता, प्रिया, पुत्री)

(ख) जटाजिनधराः ऋषयः ........................ अवगाहन्ते।

(पद्माम्, मन्दाकिनीम्, यमुनाम्)

(ग) संशितव्रता मुनयः ........................ उत्तिष्ठन्ते। (रामं, आदित्यं, कृष्णं)

(घ) नदीम् अभितः ........................ प्रनृत्त इव। (धरा, वृक्षः, पर्वतः)

(ङ) पुरवासात् ........................ दर्शनम् अधिकं महत्त्वपूर्णम्।

(ग्रामस्य, वनस्य, चित्रकूटस्य)

(च) पक्षिणः पर्यायवाची ........................ अस्ति। (रवः, द्विजः, नगः)

(छ) अस्मिन् पाठे रथाङ्गाह्वयना ........................ खगस्य पर्यायवाची अस्ति।

(कपोतस्य, चक्रवाकस्य, काकस्य)

## योग्यताविस्तारः

अनेन पाठेन प्राकृतिकसौन्दर्यस्य वर्णनम् प्रस्तुतम् अस्ति। एतस्य पाठस्य सन्देशो वर्तते यत् सौन्दर्यबोधेन सह किशोराणां छात्राणां परिवेशबोधः पर्यावरणबोधो वा वर्धेत। अस्मिन् सन्दर्भे रामायणमहाभारतपुराणादिग्रन्थानाम् परिशीलनम् लाभप्रदम् अस्ति।

## क्रियानुशीलनम्

(क) रामायणस्य किष्किन्धाकाण्डे पम्पासरोवरस्य सौन्दर्यम् अवलोकनीयम्।

(ख) अभिज्ञानशाकुन्तले प्रकृतौ कृतं मानवीकरणं पर्यावरणबोधाय अनुकरणीयम्।

(ग) पुराणेषु लता-पादपानां महत्त्वाधायकानि पद्यानि सन्ति। तेषां सङ्कलनं कृत्वा प्रदर्शनी आयोजनीया।

□

एकादशः पाठः

# व्याघ्रपथिककथा



**( अयं पाठः नारायणपण्डितरचितस्य हितोपदेशनामकस्य नीतिकथाग्रन्थस्य मित्रलाभनामकखण्डात् सङ्कलितः। हितोपदेशे बालकानां मनोरञ्जनाय नीतिशिक्षणाय च नानाकथाः पशुपक्षिसम्बद्धाःश्राविताः । प्रस्तुतकथायां लोभस्य दुष्परिणामः प्रकटितः। पशुपक्षिकथानां मूल्यं मानवानां शिक्षार्थं प्रभूतं भवति इति एतादृशीभिः कथाभिः ज्ञायते। )**

कश्चित् वृद्धव्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते- 'भो भोः पान्थाः। इदं सुवर्णकङ्कणं गृह्यताम्।' ततो लोभाकृष्टेन केनचित्पान्थेनालोचितम्- भाग्येनैतत्संभवति। किंत्वस्मिन्नात्मसंदेहे प्रवृत्तिर्न विधेया। यतः –

**अनिष्टादिष्टलाभेऽपि न गतिर्जायते शुभा ।**
**यत्रास्ते विषसंसर्गोऽमृतं तदपि मृत्यवे ॥**

'किंतु सर्वत्रार्थार्जने प्रवृत्तिः संदेह एव। तन्निरूपयामि तावत्।' प्रकाशं ब्रूते – 'कुत्र तव कङ्कणम् ?' व्याघ्रो हस्तं प्रसार्य दर्शयति। पान्थोऽवदत्- 'कथं मारात्मके त्वयि विश्वासः ? व्याघ्र उवाच – 'शृणु रे पान्थ ! प्रागेव यौवनदशायामतिदुर्वृत्त आसम्। अनेकगोमानुषाणां वधान्मे पुत्रा मृता दाराश्च। वंशहीनश्चाहम्। ततः केनचिद्धार्मिकेणाहमादिष्टः – 'दानधर्मादिकं चरतु भवान्।' तदुपदेशादिदानीमहं स्नानशीलो दाता वृद्धो गलितनखदन्तो कथं न विश्वासभूमिः ? मया च धर्मशास्त्राण्यधीतानि। शृणु –

**दरिद्रान्भर कौन्तेय ! मा प्रयच्छेश्वरे धनम्।**
**व्याधितस्यौषधं पथ्यं, नीरुजस्य किमौषधैः ॥**

अन्यच्च –

**दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।**
**देशे काले च पात्रे च तद्दानं सात्त्विकं विदुः ॥**

तदत्र सरसि स्नात्वा सुवर्णकङ्कणं गृहाण।' ततो यावदसौ तद्वचः प्रतीतो लोभात्सरः स्नातुं प्रविशति तावन्महापङ्के निमग्नः पलायितुमक्षमः। पङ्के पतितं दृष्ट्वा व्याघ्रोऽवदत् – 'अहह, महापङ्के पतितोऽसि। अतस्त्वामहमुत्थापयामि।' इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण धृतः स पान्थोऽचिन्तयत् –

**अवशेन्द्रियचित्तानां हस्तिस्नानमिव क्रिया।**
**दुर्भगाभरणप्रायो ज्ञानं भारः क्रियां विना ॥**

इति चिन्तयन्नेवासौ व्याघ्रेण व्यापादितः खादितश्च। अत उच्यते –

**कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे।**
**वृद्धव्याघ्रेण संप्राप्तः पथिकः स मृतो यथा ॥**

ABDIEL SOLUTIONS ABSOL ★PATNA★

## शब्दार्थाः

| | | | | |
|---|---|---|---|---|
| स्नातः | - | अवगाढ़ः | - | नहाया हुआ |
| सरः | - | सरोवरः | - | तालाब |
| तीरम् | - | पुलिनम् | - | तट |
| पान्थाः | - | पथिकाः | - | पथिक |
| सुवर्णकङ्कणम् | - | स्वर्णरचितं कङ्कणम् | - | सोने का कंगन |

| | | |
|---|---|---|
| लोभाकृष्टेन | लोभाभिभूतेन | लालच से आकर्षित के द्वारा |
| आलोचितम् | विचारितम् | विचार किया |
| प्रवृत्तिः | कार्यम् | कार्य |
| विधेया | कर्त्तव्या | करना चाहिए |
| निरूपयामि | निश्चयं करोमि | निश्चय करता हूँ |
| प्रसार्य | विस्तार्य | फैलाकर |
| मारात्मके | हिंसके | हिंसक पर |
| उवाच | अवदत् | कहा |
| दुर्वृत्तः | दुराचारी | बुरे आचरण वाला |
| दाराः | पत्नी | पत्नी |
| ईश्वरे | धनिके | धनी में |
| नीरुजस्य | रोगरहितस्य | निरोग का |
| अनुपकारिणे | उपकाररहिताय | उपकार न करने वाले के लिए |
| स्नात्वा | स्नानं कृत्वा | नहाकर |
| पलायितुम् | अपसर्तुम् | भागने के लिए |
| अक्षमः | असमर्थः | अशक्त |
| उक्त्वा | कथयित्वा | कहकर |
| उपगम्य | समीपं गत्वा | निकट जाकर |

ABDIEL SOLUTIONS ABSOL PATNA

## व्याकरणम्

**सन्धिविच्छेदः -**

| | |
|---|---|
| कश्चित् | कः + चित् |
| सरस्तीरे | सरः + तीरे |
| पान्थेनालोचितम् | पान्थेन + आलोचितम् |

| | | |
|---|---|---|
| भाग्येनैतत्संभवति | – | भाग्येन + एतत् + संभवति |
| किंत्वस्मिन्नात्मसंदेहे | – | किम् + तु + अस्मिन् + आत्मसंदेहे |
| प्रवृत्तिर्न | – | प्रवृत्तिः + न |
| अनिष्टादिष्टलाभेऽपि | – | अनिष्टात् + इष्टलाभे + अपि |
| गतिर्जायते | – | गतिः + जायते |
| विषसंसर्गोऽमृतम् | – | विषसंसर्गः + अमृतम् |
| तदपि | – | तत् + अपि |
| सर्वत्रार्थार्जने | – | सर्वत्र + अर्थ + अर्जने |
| तन्निरूपयामि | – | तत् + निरूपयामि |
| पान्थोऽवदत् | – | पान्थः + अवदत् |
| प्रागेव | – | प्राक् + एव |
| वधान्मे | – | वधात् + मे |
| दाराश्च | – | दाराः + च |
| वंशहीनश्चाहम् | – | वंशहीनः + च + अहम् |
| केनचिद्धार्मिकेणाहमादिष्टः | – | केनचित् + धार्मिकेण + अहम् + आदिष्टः |
| तदुपदेशादिदानीमहम् | – | तत् + उपदेशात् + इदानीम् + अहम् |
| धर्मशास्त्राण्यधीतानि | – | धर्मशास्त्राणि + अधीतानि |
| प्रयच्छेश्वरे | – | प्रयच्छ + ईश्वरे |
| व्याधितस्यौषधम् | – | व्याधितस्य + औषधम् |
| अन्यच्च | – | अन्यत् + च |
| दातव्यमिति | – | दातव्यम् + इति |
| यद्दानम् | – | यत् + दानम् |

ABDIEL SOLUTIONS ABSOL ★ PATNA ★

| | | |
|---|---|---|
| दीयतेऽनुपकारिणे | - | दीयते + अनुपकारिणे |
| तद्दानम् | - | तत् + दानम् |
| तदत्र | - | तत् + अत्र |
| यावदसौ | - | यावत् + असौ |
| तावन्महापङ्के | - | तावत् + महापङ्के |
| व्याघ्रोऽवदत् | - | व्याघ्रः + अवदत् |
| पतितोऽसि | - | पतितः + असि |
| अतस्त्वाम् | - | अतः + त्वाम् |
| इत्युक्त्वा | - | इति + उक्त्वा |
| शनैरुपगम्य | - | शनैः + उपागम्य |
| पान्थोऽचिन्तयत् | - | पान्थः + अचिन्तयत् |
| अवशेन्द्रियचित्तानाम् | - | अवश + इन्द्रियचित्तानाम् |
| चिन्तयन्नेवासौ | - | चिन्तयन् + एव + असौ |
| खादितश्च | - | खादितः + च |

**प्रकृतिप्रत्ययविभागः**

| | | |
|---|---|---|
| स्नातः | = | $\sqrt{\text{स्ना}}$ + क्त |
| प्रसार्य | = | प्र + $\sqrt{\text{सृ}}$ + णिच् + ल्यप् |
| दातव्यम् | = | $\sqrt{\text{दा}}$ + तव्यत् |
| स्नात्वा | = | $\sqrt{\text{स्ना}}$ + क्त्वा |
| पलायितुम् | = | परा + $\sqrt{\text{अय्}}$ + तुमुन् |
| उक्त्वा | = | $\sqrt{\text{वच्}}$ +क्त्वा |

| | | |
|---|---|---|
| चिन्तयन् | = | $\sqrt{\text{चिन्त्}}$ + शतृ |
| मृतः | = | मृ + क्त |
| संप्राप्त | = | सम् + प्र + $\sqrt{\text{आप्}}$ + क्त |
| उपगम्य | = | उप + $\sqrt{\text{गम्}}$ + ल्यप् |
| धृतः | = | $\sqrt{\text{धृ}}$ +क्त |

**समासः**

| | | |
|---|---|---|
| सुवर्णकङ्कणम् | – | सुवर्णस्य कङ्कणम् (षष्ठी तत्पुरुषः) |
| गलितनखदन्तः | – | गलिताः नखादन्ताःयस्य स, (बहुव्रीहिः) |
| हस्तिस्नानम् | – | हस्तिनः स्नानम्, (षष्ठी तत्पुरुषः) |
| वंशहीनः | – | वंशेन हीनः, (तृतीया तत्पुरुषः) |
| कुशहस्तः | – | कुशः हस्ते यस्य सः, (बहुव्रीहिः) |
| विश्वासभूमिः | – | विश्वासस्य भूमिः, (षष्ठी तत्पुरुषः) |

## अभ्यासः
## ( मौखिकः )

**1. अधोलिखितानां प्रश्नानाम् उत्तरं वदत –**

(क) कः स्नातः कुशहस्तः सरस्तीरे ब्रूते ?

(ख) 'भाग्येनैतत्संभवति'- इति केन आलोचितम् ?

(ग) वृद्धव्याघ्रः किं दातुम् इच्छति स्म ?

(घ) पथिकः कुत्र निमग्नः अभवत् ?

(ङ) पथिकः केन व्यापादितः खादितश्च ?

2. **उदाहरणमनुसृत्य उत्तरं वदत–**

उदाहरणमनुसृत्य – स्ना + क्त्वा – स्नात्वा

(क) ............................................................ पठित्वा।

(ख) ............................................................ खादित्वा।

(ग) ............................................................ गत्वा।

(घ) ............................................................ दृष्ट्वा।

(ङ) ............................................................ हसित्वा।

3. **उदाहरणमनुसृत्य पञ्च पदानि वदत –**

उदाहरणम् – दा + तव्यत् – दातव्यम्

(क) श्रु ...............................।

(ख) गम् ...............................।

(ग) स्मृ ...............................।

(घ) कृ ...............................।

(ङ) हस् ...............................।

4. **उदाहरणमनुसृत्य अधोलिखितेषु पदेषु प्रकृतिं प्रत्ययं च वदत – मृ + क्तः – मृतः**

(क) गतः ...............................।

(ख) उक्तः ...............................।

(ग) कृतः ...............................।

(घ) पठितः ...............................।

(ङ) चलितः ...............................।

## अभ्यासः
## ( लिखितः )

1. **अधोलिखितानाम् प्रश्नानाम् एकपदेन उत्तरं लिखत -**

(क) वृद्धव्याघ्रः कुत्र ब्रूते ?

(ख) कः लोभाकृष्टः अभवत् ?

(ग) कः सुवर्णकङ्कणं दातुम् इच्छति स्म ?

(घ) कः स्नानशीलः दाता गलितनखदन्तः च आसीत् ?

(ङ) कः वंशहीन आसीत् ?

(च) कः पङ्के अपतत् ?

2. **अधोलिखितानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखत ?**

(क) 'कुत्र तव कङ्कणम्' इति कः अवदत् ?

(ख) व्याघ्रः कीदृशः आसीत् ?

(ग) व्याघ्रेण कानि अधीतानि ?

(घ) कस्य पुत्रा दाराश्च मृताः ?

(ङ) कः महापङ्के निमग्नः पलायितुमक्षमः ?

3. **सन्धिविच्छेदं कुरुत -**

सरस्तीरे, भाग्येनैतत्संभवति, पान्थोऽवदत् वधान्मे, वंशहीनश्चाहम्, धर्मशास्त्राण्यधीतानि, केनचिद्धार्मिकेणाहमादिष्टः, अतस्त्वामहमुत्थापयामि।

4. **अधोलिखितानां पदानां प्रकृति-प्रत्ययविभागं लिखत -**

स्नात्वा, स्नातुम्, प्रसार्य, उपगम्य, उक्त्वा, धृतः।

5. **अधोलिखितानां क्रियापदानां स्ववाक्येषु प्रयोगं कुरुत -**

आलोचितम्, गृह्यताम्, दर्शयति, पतति, अचिन्तयत्, अवदत्।

6. **रिक्तस्थानानि पूरयत -**

(क) भो भोः पान्थाः ! इदं .................. गृह्यताम्।

(ख) व्याघ्रः .................. प्रसार्य दर्शयति।

(ग) तदुपदेशादिदानीमहं कथं न .................. ?

(घ) वृद्धव्याघ्रेण संप्राप्तः सः .................. मृतः।

(ङ) अहह, ...................... पतितोऽसि।

7. **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधारीकृत्य प्रश्ननिर्माणं कुरुत -**

(क) व्याघ्रः हस्तं प्रसार्य दर्शयति।

(ख) पङ्के पतितं दृष्ट्वा व्याघ्रोऽवदत्।

(ग) व्याघ्रेण धृतः स पान्थोऽचिन्तयत्।

(घ) ईश्वरे धनं मा प्रयच्छ।

(ङ) ज्ञानं क्रियां विना भारः।

8. **रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं लिखत -**

(क) तदत्र सरसि स्नात्वा सुवर्णकङ्कणं गृहाण।

(ख) असौ व्याघ्रेण व्यापादितः खादितश्च।

(ग) कथं मारात्मके त्वयि विश्वासः।

(घ) तत् उपदेशात् इदानीमहं कथं न विश्वासभूमिः।

(ङ) अवशेन्द्रियचित्तानां क्रिया हस्तिस्नानमिव भवति।

## योग्यताविस्तारः

एष पाठः लोभस्य दुष्परिणामं प्रदर्शयति तथा शिक्षयति यत् लोभः पापस्य कारणम् अस्ति। हितोपदेशे पञ्चतन्त्रे च एतादृश्यः अनेकाः कथाः सन्ति, यत्र पशु-पक्षि-मनुष्याणां लोभविषयाः रोचकतया निरूपिताः सन्ति। तासां कथानां श्रवणेन आनन्दानुभूतिस्तु भवत्येव, व्यावहारिकं ज्ञानमपि वर्धते।

## क्रियानुशीलनम्

(1) हितोपदेशस्य पञ्चतन्त्रस्य च कथानां संग्रहं कृत्वा तत्र निरूपितस्य लोभस्य दुष्परिणामस्य पृष्ठभूमिः रेखाङ्कनीया।

(2) सिंहस्य चरित्रम् अद्यापि अस्माकं समाजे तथैव विराजते। शोषकाणां वञ्चकानां च चरित्रं सिंहस्य चरित्रेण सह तोलनीयम् अस्ति।

□

**शक्रः**:- (आत्मगतम्) किं नु खलु मया वक्तव्यं, यदि दीर्घायुर्भवेति वक्ष्ये दीर्घायुर्भविष्यति। यदि न वक्ष्ये मूढ़ इति मां परिभवति। तस्मादुभयं परिहृत्य किं नु खलु वक्ष्यामि। भवतु दृष्टम्। (प्रकाशम्) भो कर्ण ! सूर्य इव, चन्द्र इव, हिमवान् इव, सागर इव तिष्ठतु ते यशः।

**कर्णः**:- भगवन् ! किं न वक्तव्यं दीर्घायुर्भवेति। अथवा एतदेव शोभनम्। कुतः -

**धर्मो हि यत्नैः पुरुषेण साध्यो भुजङ्गजिह्वाचपला नृपश्रियः।**
**तस्मात्प्रजापालनमात्रबुद्ध्या हतेषु देहेषु गुणा धरन्ते॥**

भगवन्, किमिच्छसि। किमहं ददामि।

**शक्रः**:- महत्तरां भिक्षां याचे।

**कर्णः**:- महत्तरां भिक्षां भवते प्रदास्ये। सालङ्कारं गोसहस्रं ददामि।

**शक्रः**:- गोसहस्रमिति। मुहूर्तकं क्षीरं पिबामि। नेच्छामि कर्ण ! नेच्छामि।

**कर्णः**:- किं नेच्छति भवान्। इदमपि श्रूयताम्। बहुसहस्रं वाजिनां ते ददामि।

**शक्रः**:- अश्वमिति। मुहूर्तकम् आरोहामि। नेच्छामि कर्ण! नेच्छामि।

**कर्णः**:- किं नेच्छति भगवान्। अन्यदपि श्रूयताम्। वारणानामनेकं वृन्दमपि ते ददामि।

**शक्रः**:- गजमिति। मुहूर्तकम् आरोहामि। नेच्छामि कर्ण! नेच्छामि।

**कर्णः**:- किं नेच्छति भवान्। अन्यदपि श्रूयताम्, अपर्याप्तं कनकं ददामि।

**शक्रः**:- गृहीत्वा गच्छामि। (किंचिद् गत्वा) नेच्छामि कर्ण! नेच्छामि।

**कर्णः**:- तेन हि जित्वा पृथिवीं ददामि।

**शक्रः**:- पृथिव्या किं करिष्यामि।

**कर्णः**:- तेन ह्यग्निष्टोमफलं ददामि।

**शक्रः**:- अग्निष्टोमफलेन किं कार्यम्।

**कर्णः**:- तेन हि मच्छिरो ददामि।

**शक्रः**:- अविहा अविहा।

**कर्णः**:- न भेतव्यं न भेतव्यम्। प्रसीदतु भवान्। अन्यदपि श्रूयताम्।

**अङ्गैः सहैव जनितं मम देहरक्षा**
**देवासुरैरपि न भेद्यमिदं सहस्रैः।**
**देयं तथापि कवचं सह कुण्डलाभ्यां**
**प्रीत्या मया भगवते रुचितं यदि स्यात्॥**

**शक्रः**:- (सहर्षम्) ददातु, ददातु।

**कर्णः**:- (आत्मगतम्) एष एवास्य कामः। किं नु खल्वनेककपटबुद्धेः कृष्णस्योपायः। सोऽपि भवतु। धिगयुक्तमनुशोचितम्। नास्ति संशयः। (प्रकाशम्) गृह्यताम्।

**शल्यः**:- अङ्गराज ! न दातव्यं न दातव्यम्।

**कर्णः**:- शल्यराज ! अलमलं वारयितुम् । पश्य -

**शिक्षा क्षयं गच्छति कालपर्ययात्**
**सुबद्धमूला निपतन्ति पादपाः।**
**जलं जलस्थानगतं च शुष्यति।**
**हुतं च दत्तं च तथैव तिष्ठति।**

तस्मात् गृह्यताम् (निकृत्त्य ददाति)।

## शब्दार्थाः

| | | | | |
|---|---|---|---|---|
| निवर्त्य | - | गत्वा | - | जाकर |
| प्रीतः | - | प्रसन्नः | - | खुश |
| महत्तराम् | - | अधिकतराम् | - | और बड़ी |
| वक्ष्ये | - | कथयिष्यामि | - | कहूँगा |
| परिहृत्य | - | परिहारं कृत्वा | - | हटाकर |
| इव | - | सदृश | - | जैसा, समान |
| भुजङ्गः | - | सर्पः | - | सांप |

| | | |
|---|---|---|
| क्षीरम् | दुग्धम् | दूध |
| वाजिन् | अश्वः | घोड़ा |
| वारणः | गजः | हाथी |
| कनकम् | स्वर्णम् | सोना |
| असुरः | दैत्यः | राक्षस |
| कामः | इच्छा | इच्छा |
| पादपाः | वृक्षाः | पेड़ |
| निकृत्य | खण्डयित्वा | काटकर |
| मूढः | मूर्खः | मूर्ख |
| वृन्दम् | समूहम् | समूह |
| दत्तम् | दानम् | दान |

## व्याकरणम्

ABDIEL SOLUTIONS ABSOL ★PATNA★

### सन्धिविच्छेदः

| | |
|---|---|
| सूर्येणैव | सूर्येण + एव |
| प्रीतोऽस्मि | प्रीतः + अस्मि |
| नमस्करोमि | नमः + करोमि |
| दीर्घायुर्भवेति | दीर्घ + आयुः + भव + इति |
| दीर्घायुर्भविष्यति | दीर्घ + आयुः + भविष्यति |
| तस्मादुभयम् | तस्मात् + उभयम् |
| एतदेव | एतत् + एव |
| सालङ्कारम् | स + अलङ्कारम् |
| नेच्छामि | न + इच्छामि |

| | | |
|---|---|---|
| नेच्छति | – | न + इच्छति |
| अन्यदपि | – | अन्यत् + अपि |
| किंचिद् | – | किम् + चित् |
| ह्यग्निष्टोमफलम् | – | हि + अग्निष्टोमफलम् |
| मच्छिरः | – | मत् + शिरः |
| सहैव | – | सह + एव |
| देवासुरैरपि | – | देव + असुरैः + अपि |
| तथापि | – | तथा + अपि |
| एवास्य | – | एव + अस्य |
| खल्वनेककपटबुद्धेः | – | खलु + अनेककपटबुद्धेः |
| कृष्णस्योपायः | – | कृष्णस्य + उपायः |
| सोऽपि | – | सः + अपि |
| धिगयुक्तम् | – | धिक् + अयुक्तम् |
| तथैव | – | तथा + एव |

ABSOL SOLUTIONS PATNA

**प्रकृतिप्रत्ययविभागः**

| | | |
|---|---|---|
| उपगम्य | – | उप + गम् + ल्यप् |
| वक्तव्यम् | – | वच् + तव्यत् |
| परिहृत्य | – | परि + हृ + ल्यप् |
| निवर्त्य | – | नि + वृत् + णिच् + ल्यप् |
| गृहीत्वा | – | ग्रह् + क्त्वा |
| गत्वा | – | गम् + क्त्वा |
| जित्वा | – | जि + क्त्वा |

कार्यम् - कृ + ण्यत्

भेतव्यम् - भी + तव्यत्

वारयितुम् - वृ + णिच् + तुमुन्

निकृत्य - नि + कृन्त् + ल्यप्

**समास:**

दीर्घायु: - दीर्घम् आयु: यस्य स:, बहुव्रीहि:

अग्निष्टोमफलम् - अग्निष्टोमस्य (यज्ञस्य) फलम्, षष्ठी तत्पुरुष:

मच्छिर: - मम शिर:, षष्ठी तत्पुरुष:

गोसहस्रम् - गवां सहस्रम्, षष्ठी तत्पुरुष:

सालङ्कारम् - अलङ्कारेण सहितम्, सहार्थकबहुव्रीहि:

भुजङ्गजिह्वा - भुजङ्गस्य जिह्वा, षष्ठी तत्पुरुष:

जिह्वाचपला - जिह्वा इव चपला, उपमानपूर्वपद कर्मधारय:

देहरक्षा - देहस्य रक्षा, षष्ठी तत्पुरुष:

कालपर्ययात् - कालस्य पर्यय: (परिवर्तनम्) तस्मात्, षष्ठी तत्पुरुष:

सुबुद्धमूला: - सुबुद्धं मूलं येषां ते, बहुव्रीहि:

जलस्थानगतम् - जलस्य स्थानं जलस्थानम्, षष्ठी तत्पुरुष:, तद् गतम्, द्वितीया तत्पुरुष:।

सहर्षम् - हर्षेण सहितम् (सहार्थक बहुव्रीहि:) यथा स्यात् तथा (क्रियाविशेषणम्)

आत्मगतम् - आत्मानं गतम्, द्वितीया तत्पुरुष:

शल्यराज: - शल्यानां राजा, षष्ठी तत्पुरुष:

## अभ्यासः

### ( मौखिकः )

1. अधोलिखितानां पदानां पर्यायवाचिपदानि वदत –

मूढः, वाजिन्, वारणः, क्षीरम्, भुजङ्गः, कनकम्

2. अधोलिखितानां पदानां प्रकृति-प्रत्यय-विभागं वदत –

वक्तव्यम्, उपगम्य, इच्छामि, श्रूयताम् वाजिनाम्

3. विपरीतार्थकान् शब्दान् वदत –

दीर्घायुः, प्रीतः, दत्वा, यशः, प्रविशति

4. सन्धिविच्छेदं कुरुत –

सूर्येणैव, एतदेव, प्रीतोऽस्मि, तस्मादुभयम्, नेच्छामि

## अभ्यासः

### ( लिखितः )

1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत –

(क) ततः ब्राह्मणरूपेण कः प्रविशति ?

(ख) कर्णः प्रथमं किं दातुम् इच्छति स्म ?

(ग) कालपर्ययात् का क्षयं गच्छति ?

(घ) कर्णः कस्य देशस्य राजा आसीत् ?

(ङ) किं तथैव तिष्ठति ?

2. निम्नलिखितेषु वाक्येषु रेखाङ्कितपदानां स्थाने कोष्ठात् उचितरूपम् आदाय प्रश्ननिर्माणं कुरुत –

(क) ततः प्रविशति ब्राह्मणरूपेण <u>शक्रः</u>। (कः / का)

(ख) महत्तरां <u>भिक्षां</u> याचे। (किं / काम्)

(ग) मुहूर्तकं <u>क्षीरं</u> पिबामि। (कम् / किम्)

(घ) सुबद्धमूलाः <u>पादपाः</u> निपतन्ति। (कः / के)

(ङ) जलस्थानगतं <u>जलं</u> शुष्यति। (का / किम्)

3. **अधोलिखितानाम् अव्ययपदानां सहायतया रिक्तस्थानानि पूरयत -**

च, एव, अपि, यदि, इव

(क) ........................ न वक्ष्ये मूढ इति मां परिभवति ।

(ख) एष ........................ अस्य कामः ।

(ग) सूर्यः ........................ तिष्ठतु ते यशः ।

(घ) इदं देवासुरैः ........................ न भेद्यम् ।

(ङ) जलं जलस्थानगतं ........................ शुष्यति ।

4. **सन्धिः सन्धिविच्छेदं वा कुरुत -**

(क) मच्छिरो

(ख) दीर्घायुर्भवेति

(ग) हि + अग्निष्टोमफलम्

(घ) अन्यत् + अपि

(ङ) कृष्णस्योपायः

(च) सः + अपि

(छ) सहैव

(ज) धिक् + अयुक्तम् + अनुशोचितम्

5. **अधोलिखितानां पदानां प्रकृति-प्रत्यय-विभागं कुरुत--**

गृहीत्वा, दातव्यम्, वारयितुम्, जित्वा, परिहृत्य।

6. **अधोलिखितानां पदानां स्ववाक्येषु संस्कृतभाषायां प्रयोगं कुरुत -**

कर्णः, क्षीरम्, अश्वः, करिष्यामि, इच्छसि।

7. अधोलिखितपदेषु मूलशब्दं विभक्तिं वचनं च लिखत -

| | मूलशब्दः | - | विभक्तिः | - | वचनम् |
|---|---|---|---|---|---|
| **यथा - तेन** | तत् | - | तृतीया | - | एकवचनम् |

1. पृथिव्याः -
2. सुरैः -
3. कृष्णस्य -
4. देहेषु -
5. वृक्षात् -
6. पादपाः -
7. जलम् -
8. भिक्षाम् -
9. पुरुषेण -
10. धर्मः -

8. 'क' स्तम्भे प्रदत्तानां पदानां 'ख' स्तम्भे लिखितपदैः सह समुचितं मेलनं कुरुत -

| क | ख |
|---|---|
| (क) गोसहस्रम् | पादपाः |
| (ख) अश्वम् | दानवीरः |
| (ग) कर्णः | आरोहणम् |
| (घ) सुबद्धमूलाः | क्षीरम् |
| (ङ) महत्तराम् | ब्राह्मणवेशधारी |
| (च) शक्रः | भिक्षाम् |

ABDIEL SOLUTIONS ABSOL PATNA

9. अधोलिखितानि रेखाङ्कितपदानि बहुवचने परिवर्तयत -

उदाहरणम् - एकवचने - तस्मै फलं ददाति।

बहुवचने - तेभ्यः फलं ददाति।

(क) इदम् अपि श्रूयताम्।

(ख) कनकं गृहीत्वा गच्छामि।

(ग) सः कार्यं करोति।

(घ) किं नु खलु मया वक्तव्यम्।

(ङ) इदं पुरुषस्य कार्यम्।

10. स्तम्भद्वये लिखितानां विपरीतार्थकशब्दानां मेलनं कुरुत -

| | क | ख |
|---|---|---|
| (क) | महत्तराम् | अल्पायुः |
| (ख) | प्रीतः | दाता |
| (ग) | याचकः | दुःखितः |
| (घ) | दीर्घायुः | लघुतराम् |
| (ङ) | मूढः | अपयशः |
| (च) | यशः | विद्वान् |
| (छ) | गत्वा | नास्ति |
| (ज) | अस्ति | आगत्य |

11. निम्नलिखितेषु पदेषु प्रयुक्तां विभक्तिं लिखत -

अङ्गैः, प्रीत्या, अस्य, संशयः, पृथिव्या, देहेषु, गजम्।

## योग्यताविस्तारः

'महाभारतम्' धार्मिक ऐतिहासिकश्च ग्रन्थः अस्ति। अस्मिन् ग्रन्थे भरतवंशीयानां कौरवानां पाण्डवानां च चरितं वर्णितमस्ति। ग्रन्थस्यास्य विकासस्य त्रीणि सोपानानि सन्ति -

1. 'जयः' (श्लोकसंख्या 8800)
2. 'भारतम्' (श्लोकसंख्या 24000)

3. 'महाभारतम्' (श्लोकसंख्या 100000)

**ग्रन्थेऽस्मिन् अष्टादश पर्वाणि सन्ति -**

| | | | | | |
|---|---|---|---|---|---|
| 1. | आदिपर्व | 2. | सभापर्व | 3. | वनपर्व |
| 4. | विराटपर्व | 5. | उद्योगपर्व | 6. | भीष्मपर्व |
| 7. | द्रोणपर्व | 8. | कर्णपर्व | 9. | शल्यपर्व |
| 10. | सौप्तिकपर्व | 11. | स्त्रीपर्व | 12. | शान्तिपर्व |
| 13. | अनुशासनपर्व | 14. | आश्वमेधिकपर्व | 15. | आश्रमवासिकपर्व |
| 16. | मौसलपर्व | 17. | महाप्रस्थानिकपर्व | 18. | स्वर्गारोहणपर्व |

□

त्रयोदशः पाठः

# विश्वशान्तिः



**[पाठेऽस्मिन् संसारे वर्तमानस्य अशान्तिवातावरणस्य चित्रणं तत्समाधानोपायश्च निरूपितौ । देशेषु आन्तरिकी वाह्या च अशान्तिः वर्तते। तामुपेक्ष्य न कश्चित् स्वजीवनं नेतुं समर्थः । सेयम् अशान्तिः सार्वभौमिकी वर्तते इति दुःखस्य विषयः। सर्वे जनाः तया अशान्त्या चिन्तिताः सन्ति । संसारे तन्निवारणाय प्रयासाः क्रियन्ते ।]**

वर्त्तमाने संसारे प्रायशः सर्वेषु देशेषु उपद्रवः अशान्तिर्वा दृश्यते । क्वचिदेव शान्तं वातावरणं वर्तते । क्वचित् देशस्य आन्तरिकी समस्यामाश्रित्य कलहो वर्तते, तेन शत्रुराज्यानि मोदमानानि कलहं वर्धयन्ति । क्वचित् अनेकेषु राज्येषु परस्परं शीतयुद्धं प्रचलति । वस्तुतः संसारः अशान्तिसागरस्य कूलमध्यासीनो दृश्यते । अशान्तिश्च मानवताविनाशाय कल्पते । अद्य विश्वविध्वंसकान्यस्त्राणि बहून्याविष्कृतानि सन्ति । तैरेव मानवतानाशस्य भयम् ।

अशान्तेः कारणं तस्याः निवारणोपायश्च सावधानतया चिन्तनीयौ । कारणे ज्ञाते निवारणस्य उपायोऽपि ज्ञायते इति नीतिः । वस्तुतः द्वेषः असहिष्णुता च अशान्तेः कारणद्वयम् । एको देशः अपरस्य उत्कर्षं दृष्ट्वा द्वेष्टि, तस्य देशस्य उत्कर्षनाशाय निरन्तरं प्रयतते । द्वेषः एव असहिष्णुतां

जनयति । इमौ दोषौ परस्परं वैरमुत्पादयतः । स्वार्थश्च वैरं प्रवर्धयति । स्वार्थप्रेरितो जनः अहंभावेन परस्य धर्मं जातिं सम्पत्तिं क्षेत्रं भाषां वा न सहते । आत्मन एव सर्वम् उत्कृष्टमिति मन्यते। राजनीतिज्ञाश्च अत्र विशेषेण प्रेरकाः । सामान्यो जनः न तथा विश्वसन्नपि बलेन प्रेरितो जायते । स्वार्थोपदेशः बलपूर्वकं निवारणीयः। परोपकारं प्रति यदि प्रवृत्तिः उत्पाद्यते तदा सर्वे स्वार्थं त्यजेयुः। अत्र महापुरुषाः विद्वांसः चिन्तकाश्च न विरलाः सन्ति । तेषां कर्तव्यमिदं यत् जने-जने, समाजे-समाजे, राज्ये-राज्ये च परमार्थ वृत्तिं जनयेयुः ।

शुष्कः उपदेशश्च न पर्याप्तः, प्रत्युत तस्य कार्यान्वयनञ्च जीवनेऽनिवार्यम् । उक्तञ्च – ज्ञानं भारः क्रियां विना। देशानां मध्ये च विवादान् शमयितुमेव संयुक्तराष्ट्रसंघप्रभृतयः संस्थाः सन्ति। ताश्च काले-काले आशङ्कितमपि विश्वयुद्धं निवारयन्ति । भगवान् बुद्धः पुराकाले एव वैरेण वैरस्य शमनम् असम्भवं प्रोक्तवान् । अवैरेण करुणया मैत्रीभावेन च वैरस्य शान्तिः भवतीति सर्वे मन्यन्ते। भारतीयाः नीतिकाराः सत्यमेव उद्घोषयन्ति –

**अयं निजः परो वेति गणना लघुचेतसाम् ।**
**उदारचरितानां तु वसुधैव कुटुम्बकम् ॥**

परपीडनम् आत्मनाशाय जायते, परोपकारश्च शान्तिकारणं भवति । अद्यापि परस्य देशस्य संकटकाले अन्ये देशाः सहायताराशिं सामग्रीं च प्रेषयन्ति इति विश्वशान्तेः सूर्योदयो दृश्यते ।

## शब्दार्थाः

| | | | | |
|---|---|---|---|---|
| वा | - | अथवा | - | अथवा |
| आश्रित्य | - | अवलम्ब्य | - | सहारा लेकर |
| मोदमानानि | - | प्रसन्नानि | - | आनन्दित |
| कलहम् | - | विवादम् | - | झगड़ा |
| वर्धयन्ति | - | | - | बढ़ाते हैं |
| शीतयुद्धम् | - | प्रच्छन्नयुद्धं | - | शीतयुद्ध (Cold war) |
| कूलम् | - | तटम् | - | किनारा |
| विध्वंसकानि | - | नाशकानि | - | नष्ट करने वाले |

| | | |
|---|---|---|
| विश्वसन्नपि | = | विश्वसन् + अपि |
| परोपकारम् | = | पर + उपकारम् |
| कार्यान्वियनञ्च | = | कार्यान्वियनम् + च |
| जीवनेऽनिवार्यम् | = | जीवने + अनिवार्यम् |
| क्तञ्च | = | उक्तम् + च |
| भवतीति | = | भवति + इति |
| वेति | = | वा + इति |
| वसुधैव | = | वसुधा + एव |
| अद्यापि | = | अद्य + अपि |
| परोपकारश्च | = | पर + उपकारः +च |

**समासः**

| | | |
|---|---|---|
| अशान्तिः | - | न शान्तिः (नञ् समासः) |
| महापुरुषः | - | महान् चासौ पुरुषः (कर्मधारयः) |
| शत्रुराज्यानि | - | शत्रोः राज्यानि (षष्ठी तत्पुरुषः) |
| अशान्तिसागरः | - | अशान्तेः सागरः (षष्ठी तत्पुरुषः) |
| शीतयुद्धम् | - | शीतं (प्रच्छन्नं) च तद् युद्धम् (कर्मधारयः) |
| स्वार्थोपदेशः | - | स्वार्थस्य उपदेशः (षष्ठी तत्पुरुषः) |
| परोपकारः | - | परस्य उपकारः (षष्ठी तत्पुरुषः) |
| विश्वशान्तिः | - | विश्वस्य शान्तिः (षष्ठी तत्पुरुषः) |
| असम्भवम् | - | न सम्भवम् (नञ् समासः) |
| स्वार्थप्रेरितः | - | स्वार्थेन प्रेरित : (तृतीया तत्पुरुषः) |
| सूर्योदयः | - | सूर्यस्य उदयः (षष्ठी तत्पुरुषः) |
| परपीडनम् | - | परस्य पीडनम् (षष्ठी तत्पुरुषः) |

ABDIEL SOLUTIONS ABSOL PATNA

मानवताविनाशाय - मानवतायाः विनाशः, तस्मै (षष्ठी तत्पुरुषः)

बलपूर्वकम् - बलं पूर्वं यस्य तथाभूतम् - बहुव्रीहिः (क्रियाविशेषण)

**प्रकृतिप्रत्ययविभागः**

आश्रित्य = आ + श्रि + ल्यप्

दृष्ट्वा = दृश् + त्वा

उत्कृष्टम् = उत् + कृष् + क्त

उक्तम् = वच् + क्त

शमयितुम् = शम + णिच् + तुमुन्

शमनम् = शम् + ल्युट्

नीतिः = नी + क्तिन्

शान्तिः = शम् + क्तिन्

उत्कर्षः = उत् + कृष् + घञ्

भयम् = भी + अच्

प्रेरितः = प्र + ईर् + क्त

भारः = भृ + घञ्

## अभ्यासः
## ( मौखिकः )

1. **एकपदेन उत्तरं वदत –**

(क) शत्रुराज्यानि किं वर्धयन्ति ?

(ख) अनेकेषु राज्येषु परस्परं किं प्रचलति ?

(ग) सर्वे किं त्यजेयुः ?

(घ) वैरेण कस्य शमनम् असम्भवम् ?

(ङ) क्रियां विना किं भारः ?

2. निम्नलिखितानां पदानां प्रकृतिप्रत्ययविभागं वदत –

नीतिः , उक्तम् , दृष्ट्वा , शमनम् , आश्रित्य

## अभ्यासः

## ( लिखितः )

1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत –

(क) अशान्तिसागरस्य कूलमध्यासीनः कः दृश्यते ?

(ख) अद्य विध्वंसकानि कानि आविष्कृतानि सन्ति ?

(ग) अशान्तेः कारणद्वयं किम् अस्ति ?

(घ) असहिष्णुतां कः जनयति ?

(ङ) कः बलपूर्वकं निवारणीयः ?

2. अधोलिखितपदानां स्ववाक्येषु संस्कृते प्रयोगं कुरुत –

अयम् , अशान्तिः , मैत्री , उत्कर्षम् , प्रेरकः , परोपकारः ।

3. सन्धिविच्छेदं कुरुत –

परोपकारः, निवारणोपायश्च, विश्वसन्नपि, उक्तञ्च, भवतीति, वसुधैव, जीवनेऽनिवार्यम् ।

4. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधारीकृत्य प्रश्ननिर्माणं कुरुत –

(क) कारणे ज्ञाते निवारणस्य उपायोऽपि ज्ञायते ।

(ख) सर्वेषु देशेषु अशान्तिः दृश्यते ।

(ग) स्वार्थः वैरं प्रवर्धयति ।

(घ) राजनीतिज्ञाः अत्र विशेषेण प्रेरकाः ।

(ङ) सामान्यो जनः न तथा विश्वसन्नपि बलेन प्रेरितो जायते ।

ABDIEL SOLUTIONS ABSOL PATNA

5. **अधोलिखितानां पदानां प्रकृतिप्रत्ययविभागं कुरुत –**

उक्तम् , नीतिः , भारः , शमनम् , शान्तिः , आश्रित्य

6. **अधोलिखितपदेषु मूलशब्दं विभक्तिं वचनं च लिखत**

अशान्तेः , बलेन , महापुरुषाः , वैरस्य , दोषौ , अपरस्य , संकटकाले ।

7. **अधोलिखितानि वाक्यानि बहुवचने परिवर्तयत –**

उदाहरणम् – एकवचने – महापुरुषः अस्ति ।

बहुवचने – महापुरुषाः सन्ति ।

(क) विद्वान् कथयति ।

(ख) जनः जानाति ।

(ग) भारतीयः नीतिकारः उद्घोषयति ।

(घ) देशः प्रेषयति ।

(ङ) सः उत्कृष्टं मन्यते ।

(च) त्वं कुत्र गच्छसि ?

8. **स्तम्भद्वये लिखितानां विपरीतार्थकशब्दानां मेलनं कुरुत –**

| क | | ख |
|---|---|---|
| स्वार्थः | – | विशेषः |
| बलम् | – | परमार्थः |
| सामान्यः | – | अपकर्षः |
| उत्कर्षः | – | निर्बलम् |
| द्वेषः | – | उष्णम् |
| शीतम् | – | निर्माणम् |
| विध्वंसम् | – | मित्रता |

9. कोष्ठान्तर्गतानां शब्दानां साहाय्येन रिक्तस्थानानि पूरयत -

(क्वचिदपि , वैरस्य , विरला:, सावधानतया, पर्याप्त:)

(क) अशान्ते: कारणं तस्या: निवारणोपायश्च ………………… चिन्तनीयौ ।

(ख) अवैरेण करुणया मैत्रीभावेन च ………………… शान्ति: भवति ।

(ग) अत्र महापुरुषा: ………………… सन्ति ।

(घ) शुष्क: उपदेश: न ………………… ।

(ङ) ………………… शान्तं वातावरणं वर्तते ।

## योग्यताविस्तार:

पठितपाठेन विश्वशान्तये जनजागरणं कर्तुं प्रयास: कृत: । अस्य पाठस्य सन्देश: अयमेव अस्ति यत् शान्त्या एव विश्वकल्याणं भवेत् । किन्तु नानाकारणै: सम्प्रति संसारे अशान्ति: अनुभूयते । द्वेष: असहिष्णुता , अविश्वास: , असंतोष: , स्वार्थ: चादय: दुर्गुणा: प्रवृद्धा: सन्ति । तत: कुत: शान्ति: ? शान्ति: भारतीयदर्शनस्य मूलतत्त्वमस्ति । इयं शान्ति: धर्ममूला चास्ति । ''धर्मो रक्षति रक्षित:'' इति प्राचीन: सन्देश: विश्वस्य अस्तित्व - रक्षणाय प्रेरयति । धर्मस्य दश लक्षणानि सन्ति – धृति: क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रह: । धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥

## क्रियानुशीलनम् :

**आगच्छन्तु ! वयं सर्वे शिक्षका: छात्राश्च**
**समये - समये किमपि किमपि कुर्याम !**

(क) इतिहासशिक्षकस्य सहयोगेन प्रथमविश्वयुद्धस्य द्वितीयविश्वयुद्धस्य च पृष्ठभूमिं जानीयाम, तयो: दुष्परिणामान् अवगच्छाम ।

(ख) आधुनिकसमये विविधस्तरेषु अशान्ते: यद् वातावरणं निर्मीयमाणं दृश्यते, तस्य कारणानि परिस्थितिञ्च अवगच्छाम ।

(ग) अस्माभि: समाजस्तरे जातिभेदस्य, सम्प्रदायभेदस्य, धर्मभेदस्य, वर्गभेदस्य, क्षेत्रभेदस्य च आधारेण जायमानानाम् अशान्तिकारणानां निराकरणाय प्रेरका: कार्यक्रमा: आयोजनीया: ।

□

चतुर्दशः पाठः

# शास्त्रकाराः

**( भारते वर्षे शास्त्राणां महती परम्परा श्रूयते। शास्त्राणि प्रमाणभूतानि समस्तज्ञानस्य स्रोत:स्वरूपाणि सन्ति। अस्मिन् पाठे प्रमुखशास्त्राणां निर्देशपूर्वकं तत्प्रवर्तकानाञ्च निरूपणं विद्यते। मनोरञ्जनाय पाठेऽस्मिन् प्रश्नोत्तरशैली आसादिता वर्तते। )**

**( शिक्षकः कक्षायां प्रविशति, छात्राः सादरमुत्थाय तस्याभिवादनं कुर्वन्ति। )**

**शिक्षकः:-** उपविशन्तु सर्वे। अद्य युष्माकं परिचयः संस्कृतशास्त्रैः भविष्यति।

**युवराजः:-** गुरुदेव ! शास्त्रं किं भवति ?

**शिक्षकः:-** शास्त्रं नाम ज्ञानस्य शासकमस्ति। मानवानां कर्त्तव्याकर्तव्यविषयान् तत् शिक्षयति। शास्त्रमेव अधुना अध्ययनविषयः (Subject) कथ्यते, पाश्चात्यदेशेषु अनुशासनम् (Discipline) अपि अभिधीयते। तथापि शास्त्रस्य लक्षणं धर्मशास्त्रेषु इत्थं वर्तते -

प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा।
पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते।

**अभिनवः:-** अर्थात् शास्त्रं मानवेभ्यः कर्त्तव्यम् अकर्त्तव्यञ्च बोधयति। शास्त्रं नित्यं भवतु वेदरूपम्, अथवा कृतकं भवतु ऋष्यादिप्रणीतम्।

**शिक्षकः:-** सम्यक् जानासि वत्स ! कृतकं शास्त्रं ऋषयः अन्ये विद्वांसः वा रचितवन्तः। सर्वप्रथमं षट् वेदाङ्गानि शास्त्राणि सन्ति। तानि - शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दः ज्योतिषं चेति।

**इमरानः:-** गुरुदेव ! एतेषां विषयाणां के-के प्रणेतारः ?

**शिक्षकः-** शृणुत यूयं सर्वे सावहितम्। शिक्षा उच्चारणप्रक्रियां बोधयति। पाणिनीयशिक्षा तस्याः प्रसिद्धो ग्रन्थः। कल्पः कर्मकाण्डग्रन्थः सूत्रात्मकः। बौधायन-भारद्वाज-गौतम-वसिष्ठादयः ऋषयः अस्य शास्त्रस्य रचयितारः। व्याकरणं तु पाणिनिकृतं प्रसिद्धम्। निरुक्तस्य कार्यं वेदार्थबोधः। तस्य रचयिता यास्कः। छन्दः पिङ्गलरचिते सूत्रग्रन्थे प्रारब्धम्। ज्योतिषं लगधरचितेन वेदाङ्गज्योतिषग्रन्थेन प्रावर्तत।

**अब्राहमः-** किमेतावन्तः एव शास्त्रकाराः सन्ति ?

**शिक्षकः-** नहि नहि। एते प्रवर्त्तकाः एव। वस्तुतः महती परम्परा एतेषां शास्त्राणां परवर्त्तिभिः सञ्चालिता। किञ्च, दर्शनशास्त्राणि षट् देशेऽस्मिन् उपक्रान्तानि।

**श्रुतिः-** आचार्यवर ! दर्शनानां के-के प्रवर्तकाः शास्त्रकाराः ?

**शिक्षकः-** सांख्यदर्शनस्य प्रवर्तकः कपिलः। योगदर्शनस्य पतञ्जलिः। एवं गौतमेन न्यायदर्शनं रचितं कणादेन च वैशेषिकदर्शनम्। जैमिनिना मीमांसादर्शनम्, बादरायणेन च वेदान्तदर्शनं प्रणीतम्। सर्वेषां शताधिकाः व्याख्यातारः स्वतन्त्रग्रन्थकाराश्च वर्तन्ते।

**गार्गी-** गुरुदेव ! भवान् वैज्ञानिकानि शास्त्राणि कथं न वदति ?

**शिक्षकः-** उक्तं कथयसि । प्राचीनभारते विज्ञानस्य विभिन्नशाखानां शास्त्राणि प्रावर्तन्त। आयुर्वेदशास्त्रे चकरसंहिता, सुश्रुतसंहिता चेति शास्त्रकारनाम्नैव प्रसिद्धे स्तः। तत्रैव रसायनविज्ञानम्, भौतिकविज्ञानञ्च अन्तरर्भू स्तः। ज्योतिषशास्त्रेऽपि खगोलविज्ञानं गणितम् इत्यादीनि शास्त्राणि सन्ति। आर्यभटस्य ग्रन्थः आर्यभटीयनामा प्रसिद्धः । एवं वराहमिहिरस्य बृहत्संहिता विशालो ग्रन्थः यत्र नाना विषयाः समन्विताः। वास्तुशास्त्रमपि अत्र व्यापकं शास्त्रमासीत्। कृषिविज्ञानं च पराशरेण रचितम्। वस्तुतो नास्ति शास्त्रकाराणाम् अल्पा संख्या।

**वर्गनायकः-** गुरुदेव ! अद्य बहुज्ञातम्। प्राचीनस्य भारतस्य गौरवं सर्वथा समृद्धम्।

(शिक्षकः वर्गात् निष्क्रामति। छात्राः अनुगच्छन्ति)

ABDIEL SOLUTIONS ABSOL PATNA

## शब्दार्थाः

| | | | | |
|---|---|---|---|---|
| सादरम् | - | आदरेण सहितम् | - | आदर सहित |
| अभिवादनम् | - | नमस्कारः | - | अभिवादन, नमस्कार |
| उपविशन्तु | - | आसन्ताम् | - | बैठें |

| | | |
|---|---|---|
| गुरुदेव | - आचार्य | - गुरुदेव |
| धर्मशास्त्रेषु | - धर्मस्याध्ययनं येषु-शास्त्रेषु वन्ति तेषु | - धर्मशास्त्रों में |
| इत्थम् | - एवम् | - इस प्रकार |
| प्रवृत्तिः | - अनुरक्ति | - अविच्छिन्नता, सांसारिक विषयों में अनुरक्ति |
| निवृत्तिः | - समाप्तिः | - विरक्ति |
| कृतकेन | - कृत्रिमेण | - बनावटी, मानव-रचित |
| अभिधीयते | - कथ्यते | - कहा जाता है |
| बोधयति | - ज्ञापयति | - ज्ञापित कराता है, ज्ञान कराता है। |
| प्रणेतारः | - लेखकाः | - प्रणयन करने वाला, लेखक |
| सावहितम् | - सावधानतया | - सावधानीपूर्वक |
| प्रारब्धम् | - आरब्धम् | - आरम्भ किया हुआ, भाग्य |
| प्रवर्त्तकाः | - संस्थापकाः | - संस्थापक |
| उपक्रान्तानि | - प्रवर्तितानि | - आरम्भ हुए |
| प्रावर्तत | - आरभत | - आरम्भ हुआ |
| उपदिश्येत | - अनुशास्येत | - उपदेश दिया जाता है, सीख दी जाती है |

## व्याकरणम्

**(क) सन्धि-विच्छेदः**

पाठेऽस्मिन् - पाठे + अस्मिन्

प्रश्नोत्तरम् - प्रश्न + उत्तरम्

कर्त्तव्याकर्त्तव्यम् - कर्त्तव्य + अकर्त्तव्यम्

| | | |
|---|---|---|
| तथापि | – | तथा + अपि |
| प्रवृत्तिर्वा | – | प्रवृत्तिः + वा |
| येनोपदिश्येत | – | येन + उपदिश्येत |
| तच्छास्त्रम् | – | तत् + शास्त्रम् |
| अकर्त्तव्यञ्च | – | अकर्त्तव्यम् + च |
| ऋष्यादि | – | ऋषि + आदि |
| उच्चारण | – | उत् + चारणम् |
| देशेऽस्मिन् | – | देशे + अस्मिन् |
| शताधिकाः | – | शत + अधिकाः |
| ग्रन्थकाराश्च | – | ग्रन्थकाराः + च |
| चेति | – | च + इति |
| तत्रैव | – | तत्र + एव |
| इत्यादीनि | – | इति + आदीनि |
| नास्ति | – | न + अस्ति |

ABSOL
PATNA

**( ख ) समासः**

| | | | | |
|---|---|---|---|---|
| सादरम् | – | आदरेण युक्तम् | – | अव्ययीभावः |
| संस्कृतशास्त्रैः | – | संस्कृतस्य शास्त्रैः | – | षष्ठी तत्पुरुषः |
| वेदरूपम् | – | वेदः रूपम् यस्य | – | बहुव्रीहिः |
| सावहितम् | – | अवहितेन सहितम् | – | अव्ययीभावः |
| उच्चारणप्रक्रियाम् | – | उच्चारणस्य प्रक्रियायाम् | – | षष्ठी तत्पुरुषः |
| कर्मकाण्डग्रन्थः | – | कर्मकाण्डस्य ग्रन्थः | – | षष्ठी तत्पुरुषः |
| पाणिनिकृतम् | – | पाणिनिना कृतम् | – | तृतीया तत्पुरुषः |
| वेदार्थबोधः | – | वेदार्थस्य बोधः | – | षष्ठी तत्पुरुषः |
| आचार्यप्रवर | – | आचार्येषु प्रवर | – | सप्तमी तत्पुरुषः |

| | | | | |
|---|---|---|---|---|
| शताधिकाः | – | शतात् अधिकाः | – | पञ्चमी तत्पुरुषः |
| खगोलविज्ञानम् | – | खगोलस्य विज्ञानम् | – | षष्ठी तत्पुरुषः |
| कृषिविज्ञानम् | – | कृषेः विज्ञानम् | – | षष्ठी तत्पुरुषः |

## (ग) व्युत्पत्तिः (प्रकृति-प्रत्यय-विभागः)

| | | |
|---|---|---|
| निरूपणम् | – | नि + सह् + णिच् + ल्युट् |
| उत्थाय | – | उत् + स्था + ल्यप् |
| अभिवादनम् | – | अभि + वद् + णिच् + ल्युट् |
| शासकम् | – | शास् + ण्वुल् |
| अनुशासनम् | – | अनु + शास् + ल्युट् |
| लक्षणम् | – | लक्ष् + ल्युट् |
| प्रवृत्तिः | – | प्र + वृत् + क्तिन् |
| निवृत्तिः | – | नि + वृत् + क्तिन् |
| कर्त्तव्यम् | – | कृ + तव्य |
| प्रणीतम् | – | प्र + नी + क्त |
| निरुक्तम् | – | निर् + वच् + क्त |
| कृतम् | – | कृ + क्त |
| प्रवर्तकः | – | प्र + वृत् + णिच् + ण्वुल् |
| दर्शनम् | – | दृश् + ल्युट् |
| प्रारब्धम् | – | प्र + आ + रभ् + क्त |
| विज्ञानम् | – | वि + ज्ञा + ल्युट् |
| रचितम् | – | रच् + क्त |
| आर्यभटीयम् | – | आर्यभट + छ |

## अभ्यासः

### ( मौखिकः )

1. **अधोलिखितानां प्रश्नानाम् उत्तरम् एकपदेन दत्त –**

(क) कक्षायां कः प्रविशति ?

(ख) के सादरमुत्थाय तस्याभिवादनं कुर्वन्ति ?

(ग) वेदस्य कति अङ्गानि भवन्ति ?

(घ) शिक्षा कां बोधयति ?

(ङ) पणिनिना कृतम् किं प्रसिद्धम् ?

2. **सन्धिविच्छेदं कुरुत –**

(क) उच्चारणम्

(ख) वेदार्थबोधः

(ग) व्युत्पत्तिः

(घ) निरुक्तम्

(ङ) प्रश्नोत्तरम्

3. **समासविग्रहं कुरुत–**

(क) ज्योतिषशास्त्रम् (ख) न्यायदर्शनम्

(ग) पाणिनिकृतम् (घ) पिङ्गलरचिते

4. **प्रकृति-प्रत्यय-विभागं कुरुत–**

(क) आर्यभटीयम् (ख) विज्ञानम्

(ग) रचितम् (घ) ज्ञातम्

(ङ) प्रवर्त्तकः

ABDIEL SOLUTIONS ABSOL * PATNA *

5. **विपरीतार्थकान् शब्दान् वदत -**

(क) उत्थाय (ख) शासकम्

(ग) कर्त्तव्यम् (घ) अस्ति

(ङ) उच्चैः (च) चरः

(छ) गमनम्।

## अभ्यासः

### ( लिखितः )

1. **अधोलिखितानां पदानाम् उत्तराणि संस्कृतभाषया लिखत -**

(क) संस्कृतशास्त्रैः सह केषां परिचयो भविष्यति ?

(ख) शास्त्रस्य लक्षणं गुरुणा किं प्रोक्तम् ?

(ग) धर्मशास्त्रे शास्त्रस्य किं लक्षणं प्रोक्तम् ?

(घ) वेदरूपं शास्त्रं किं भवति ?

(ङ) ऋष्यादिभिः प्रणीतं किं भवति ?

(च) कति वेदाङ्गानि सन्ति ?

(छ) वेदाङ्गानां नामानि लिखत ?

(ज) केन कृतं व्याकरणं प्रसिद्धम् ?

(झ) कपिलः कस्य दर्शनस्य प्रवर्तकः आसीत् ?

2. **अधोलिखितवाक्येषु रेखाङ्कितपदानि आधारीकृत्य प्रश्ननिर्माणं कुरुत-**

यथा - उत्तर - पराशरेण मुनिना कृषिविज्ञानं प्रवर्तितम्।

प्रश्नः - केन मुनिना कृषिविज्ञानं प्रवर्तितम् ?

(क) भारतवर्षे <u>शास्त्राणां</u> महती परम्परा श्रूयते।

(ख) अद्य <u>युष्माकं</u> परिचयः संस्कृतशास्त्रैः भविष्यति।

(ग) <u>शास्त्रं</u> मानवेभ्यः कर्त्तव्यम् अकर्त्तव्यञ्च बोधयति।

(घ) शास्त्रं <u>नित्यं</u> भवति वेदरूपम्।

(ङ) ऋष्यादिप्रणीतम् कृतकं भवति।

(च) जैमिनिना मीमांसादर्शनं प्रणीतम्।

(छ) सर्वेषां शताधिकाः व्याख्यातारः स्वतन्त्रग्रन्थकाराश्च वर्तन्ते।

**3. अधोलिखितक्रियापदानां स्ववाक्येषु प्रयोगं कुरुत –**

(क) भवति (ख) प्रणीतम् (ग) प्रवर्त्तकाः (घ) वर्तन्ते

(ङ) वदति (च) कथयसि (छ) अल्पा।

**4. कोष्ठान्तर्गतानां शब्दानां साहाय्येन रिक्तस्थानानि पूरयत –**

(प्रविशति, महती, सादरमुत्थाय, युष्माकम्, मानवेभ्यः, तत्रैव, नास्ति।)

(क) भारतवर्षे शास्त्राणां ........................ परम्परा श्रूयते।

(ख) शिक्षकः कक्षायां ........................।

(ग) छात्राः ........................ तस्याभिवादनं कुर्वन्ति।

(घ) अद्य ........................ परिचयः संस्कृतशास्त्रैः भविष्यति।

(ङ) शास्त्रं ........................ कर्त्तव्यम् अकर्त्तव्यञ्च बोधयति।

(च) ........................ रसायनविज्ञानम्, भौतिकविज्ञानञ्च–अन्तर्भूतः।

(छ) वस्तुतो ........................ शास्त्रकाराणाम् अल्पा संख्या।

**5. रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं लिखत –**

(क) उपविशन्तु सर्वे।

(ख) अद्य युष्माकं परिचयः संस्कृतशास्त्रैः भविष्यति।

(ग) कृतकं शास्त्रं ऋषयः अन्ये विद्वांसः वा रचितवन्तः।

(घ) पाणिनीयशिक्षा तस्याः प्रसिद्धो ग्रन्थः।

(ङ) सर्वेषां शताधिकाः व्याख्यातारः स्वतन्त्रग्रन्थकाराश्च वर्तन्ते।

(च) प्राचीनभारते विज्ञानस्य विभिन्नशाखानां शास्त्राणि प्रावर्तन्त।

(छ) वराहमिहिरस्य बृहत्संहिता विशालो ग्रन्थः यत्र नाना विषयाः समन्विताः।

ABDIEL SOLUTIONS ABSOL PATNA

## योग्यताविस्तारः

(प्रस्तुतपाठः भारतीयशास्त्रकाराणां संक्षिप्तं परिचयं प्रस्तौति। भारतस्य पुण्यभूमिः शास्त्रकाराणां मातृका वर्तते। वेदाङ्गानां, दर्शनानां, विज्ञानानां, साहित्य-व्याकरणादिशास्त्राणां महती शास्त्रपरम्परा वर्तते। धर्मशास्त्रस्य, अर्थशास्त्रस्य, कामशास्त्रस्य, तन्त्रशास्त्रस्य च सुदीर्घा परम्परा चापि अवलोक्यते।)

## करणीयं कार्यम्

1. संस्कृतशिक्षकाणां समीपवर्तिनां संस्कृतविदुषां च सहयोगेन विविधशास्त्रकाराणां सूची निर्मातव्या। तत्र शास्त्रकारनाम-शास्त्रनाम-प्रतिपाद्यविषयरचनाकालादितथ्यानि संकेतरूपेण स्पष्टतया लेखनीयानि सन्ति।

2. विहारप्रदेशः शास्त्रकाराणाम् उर्वरभूमिरूपेण आदिकालतः विख्यातः अस्ति। विदेहराजस्य जनकस्य राजसभा वस्तुतः शास्त्रसभा एव आसीत्। यतो हि सम्पूर्णभारतीयवैदिकदर्शनस्य व्यावहारिकं पक्षं स्वीकृत्य जीवनं यापयन् मिथिलेशः जनकः दृश्यते। इदमेव कारणं यत् स विदेह इत्युच्यते। अत्र अष्टावक्रादीनां शास्त्रचर्चा प्रसिद्धा वर्तते। एतत्सम्बद्धकथाः छात्राः संस्कृतशिक्षकसहयोगेन जानीयुः।

3. विहारे पुरुषार्थचतुष्टयस्य प्रतिपादकानां शास्त्राणां प्रवर्तकानां पुण्यभूमिः विद्यते। यथा–

   (क) धर्मशास्त्रस्य कृते याज्ञवल्क्यस्मृतिः

   (ख) अर्थशास्त्रस्य कृते कौटिलीयमर्थशास्त्रम्

   (ग) कामशास्त्रस्य कृते वात्स्यायनकामसूत्रम्

   (घ) मोक्षशास्त्रस्य कृते गौतमस्य न्यायसूत्रम्, कणादस्य वैशेषिकसूत्रम्, कपिलस्य सांख्यसूत्रम्, जैमिनेः मीमांसासूत्रम् च प्रमुखानि शास्त्राणि सन्ति।

   (ङ) विहारस्य शास्त्रनिर्माणक्षेत्रे महद् योगदानं वर्तते। विशेषतः नव्यन्यायस्य। तन्त्रस्य च क्षेत्रे। तत्र गङ्गेशोपाध्यायादीनां नामानि प्रसिद्धानि।

□